किं न सर्वज्ञासंज्ञानं तस्माद्विलक्षणं च तत् अत एव लोकोत्तरं च तत्स्वसंवेदनं तस्य गोचरत्वादिति हेतोः प्रत्येयान्नाप्यो प्यभिधीय
ताम् अभिधया मुख्यया वृत्त्या साक्षात्संकेतेन बोध्यतां न तु एवारोपेणेत्यर्थः अत्रास्मसंवेदनस्य मानत्वेन प्रत्यक्षादिप्रमाणस्वरूप
णादिसंयोगजन्यत्वलक्षणं मितयोगिज्ञानाद्वेद्यवेदनाद्विगलितवेद्यात्मत्वेन विशेषः परिमितेतरयोगिसंवेदनाद्विनाशितस
र्ववासनात्वादिवासनामयत्वेन भेदः २ तद्वादृकं च तन्निर्विकल्पकं विभावादिविमर्शप्रधानत्वात् १ इन्द्रियार्थसन्निकर्ष
मात्रेणोत्पद्यमानं ज्ञानमात्रादिविमर्शशून्यं हि निर्विकल्पकं रसस्तु विभावादिविमर्शप्रधानः कथं तद्ग्राह्यः स्यादित्यर्थः २ नापि स

प्रतीतिस्वरूपमाह पुरस्त्वपरिस्फुरन्नित्यादि अत्रस्फुरणादीनां स्वयं पश्चात्प्रमृष्टैरेतैर्हेतुव्यापारादिक्षणत्वप्रयोगः एवं ब्रह्मास्वादमिवे
त्यत्र तमुक्तिदशायां ब्रह्ममात्रमेव स्वास्वादेन विभावादिसंभेदोऽपीति भेदादिवशात्प्रयोगः अत एवाह लोकिकेति लोकेहृष्ट
ष्टः अलौकिकचमत्कारो विस्मयस्य कारी रत्यादिः रत्यादीनामादिशब्दात् हासशोकादिग्रहणं रत्यादिः स्थायिभावो रसो भवतीति
संबंधः २ एवं रसस्य लक्षणमुक्त्वा स्वरूपमाह ३ स च न कार्यो विभावादिनाशेऽपि तस्य संभवप्रसंगात् नापि ज्ञाप्यः सिद्धस्य तस्या
भावात् अपितु विभावादिभिर्व्यंजितश्चर्वणीयः कारकज्ञापकाभ्यामन्यत्क्व दृष्टमिति चेन्न क्वचिद्दृष्टमित्यलौकिकत्वप्रसिद्धेर्भूषण
मेतन्न दूषणम् चर्वणानिष्पत्त्या तस्य निष्पत्तिरुपचरितेति कार्योऽप्युच्यताम् लौकिकप्रत्यक्षादिप्रमाणतादात्म्याववोधशा
लिमितयोगिज्ञानवेद्यसंस्पर्शरहितस्वात्ममात्रपर्यवसितपरिमितेतरयोगिसंवेदनविलक्षणलोकोत्तरस्वसंवेदनगोचर इति
प्रत्येयोऽप्यभिधीयताम् तद्ग्राहकं च न निर्विकल्पकं विभावादिविमर्शप्रधानत्वात् नापि सविकल्पकं चर्व्यमाणस्यालौकि
कानंदमयस्य स्वसंवेदनसिद्धत्वात् उभयाभावरूपस्य चोभयात्मकत्वमपि पूर्ववल्लोकोत्तरतामेव गमयति न तु विरोधमि
ति श्रीमदाचार्याभिनवगुप्तपादाः एवं रसस्य लक्षणमुक्त्वा स्वरूपमाह ३ स च न कार्यो विभावादिनाशेऽपि तस्य संभ
वप्रसंगात् १ भासमाने सत्येव विभावादिज्ञाने रसस्तु हेतोरपि रसीभवति यदि विभावादिज्ञानकार्यो रसः स्यात् तर्हि कारण
ज्ञानेन कार्यज्ञानयोर्युगपज्ज्ञानयोर्युगपदवस्थानादस्य प्रतीतिकाले विभावादिज्ञानं नोल्लसेत् तर्हि चंदनस्पर्शज्ञाने प्रत्यक्षस्य
ज्ञाने चैकदा भवतीति २ नापि ज्ञाप्यः सिद्धस्य तस्याभावात् २ पूर्वं सिद्धस्य घटादेः प्रदीपादिना ज्ञापकेन ज्ञाप्यते न त्वेवं विभा
वादिभ्यः प्राक् रसः सिद्धो विभावादिसमूहालंबनात्मकत्वादेवास्य सत्त्वात् २ कथं तर्हि भवतो विभावादिसंयोगाद्रसनिष्प
त्तिरित्यत्र चर्व्यमाणत्वान्निष्पत्तिरित्युक्तमित्याशंक्याह ३ अपितु विभावादिभिर्व्यंजितश्चर्वणीयः अंगत्वेन कभावेनाघ्रेऽतनमि

की॰ टी॰ ३३

मलिनोत्तुरगर्भमेघैर्मधुकरकोकिलकूजितैर्दिशां श्रीः । धरणिरभिनवाङ्कुराङ्कटङ्का प्रणतिपरे दयिते प्रसीद मुग्धे ॥ एवं परिमृदितमृणाली-
म्लानमङ्गं प्रवृत्तिः कथमपि परिवारप्रार्थनाभिः क्रियासु । कलयति च हिमांशोर्निष्कलङ्कस्य लक्ष्मीमभिनवकरिदन्तच्छेदका-
न्तः कपोलः ॥ दूरादुत्सुकमागते विवलितं सम्भाषिणि स्फारितं संश्लिष्यत्यरुणं गृहीतवसने किञ्चाञ्चितभ्रूलतं । मानिन्याश्चरणा-
नतिव्यतिकरे बाष्पाम्बुपूर्णेक्षणं चक्षुर्जातमहो प्रपञ्चचतुरं जातागसि प्रेयसि ॥ इत्यादौ च यद्यपि विभावानामनुभावानामौत्सुक्य-
व्रीडाहर्षकोपासूयाप्रसादानां व्यभिचारिणां केवलानामस्ति स्थितिस्तथाप्येतेषामसाधारणत्वमित्यन्यतमद्वयाक्षेपकत्वे स-
ति नानैकान्तिकत्वमिति ॥ यद्यपि प्रथमोदाहरणे केवलानां विभावानां द्वितीयोदाहरणे केवलानामनुभावानां तृतीयोदाह-
रणे केवलानां व्यभिचारिणां च स्थितिः साक्षादुद्दिष्टा तथाप्येतेषां विभावादीनां प्रत्येकमसाधारणत्वं विभावयन्ति रत्यादीनि
त्यसाधारणधर्मवत्त्वमस्तीत्यतः अन्यतमद्वयाक्षेपकत्वे विभावस्योक्तौ रत्यादिभावकत्वमसाधारणधर्मवत्त्वमनुभावव्य-
भिचारिभ्यां कार्यसहकारिभ्यां विना न संभवतीति तयोराक्षेपतो लब्धत्वे कस्मिंश्चिज्जनके साक्षान्निर्दिष्टेऽन्ययोर्द्वयोराक्षेपलाभ इति
द्वौ विभावादिभिर्मिलितैः रस इति स्थिते नानैकान्तिकत्वं पृथक्प्रत्येकत्वेन हेतुत्वे मिलितानामिति प्राचीनमते दियत्वं नास्तीत्यतः
अनैकान्तिकोऽव्यभिचरितः [illegible] इति नैयायिकाः ॥ तथा च विपदलिमलिनेत्यत्र साक्षादुक्तेनालम्बनविभावेन नायिक-
या मेघादिभिश्चोद्दीपनविभावैर्व्यञ्जकैः मालतीनां वेष्टादयोऽनुभावाः मोहादयो व्यभिचारिणश्च व्यज्यन्ते ॥ तथा परिमृदितमृणा-
लीत्यत्र विरहिण्याश्चेष्टाभिरनुभावैः साक्षादुक्तैः कार्योपलब्ध्याकारणानुमानमिति न्यायात् साश्रयत्वेनालम्बनविभावो नायि-
कान्तिज्योत्स्नोत्पत्तिकालश्चोद्दीपनविभावः ग्लानितानतयाकार्श्यं तत्कारणचिन्ता क्रियासु प्रवृत्तेः कारणमालस्यं श्रमो निर्वेदादयश्च
व्यज्यन्ते ॥ दूरादुत्सुकमित्यत्र विवलितमिति व्रीडा स्फारितमिति हर्षः अरुणमिति कोपः अञ्चितभ्रूलतमित्यसूया बाष्पाम्बुपूर्णेक्ष- ॥ ३३

33

विकल्पकेनस्वप्रमाणाभ्यां लौकिकानंदमयपरसंवेदनसिद्धत्वादिति २ नामजात्यादिविशेषणविशेष्यभावावगाहित्वाभावेन सविकल्प
केरसस्य तत्स्वप्रकाशस्य विभावादिभिः सहत्वविशेषणविशेष्यभाव इत्यर्थः २ उभयाभावरूपस्योभयात्मकत्वमपि पूर्ववल्लोको
त्तरतामेव गमयति न तु विरोधम् २ निर्विकल्पकताभावः सविकल्पकं सविकल्पकताभावो निर्विकल्पकमित्येवंप्रकारेणोभया-
भावरूपस्याप्युभयात्मकत्वं लोक एव विरुद्धं न तु रसे इत्यर्थः २ इति श्रीमदाचार्याभिनवगुप्तपादाः २ विश्वनाथेत्यनेन संबंधः तथाच
ध्वन्यालोचने प्रथमोल्लासे शृङ्गसमर्पकतया हृदयसंवादस्तद्विभावानुभावसमुदितप्राक्तिनिविष्टान्यादिवासनानुरागसुकुमार
स्वसंविदानंदचर्वणाव्यापाररसनीयरूपो रसः इति २ ननु यदि विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिस्तर्हि कैकस्य विभावस्यानु
भावव्यभिचारिणो वेति विभज्य वास्वाद्यत्वापत्त्याशंक्याह ३ व्याघ्रादयो विभावा भयानकस्येव वीराद्भुतरौद्राणामश्रुपातादयोनुभावाः
शृंगारस्येव करुणभयानकयोः चिंतादयो व्यभिचारिणः शृंगारस्येव वीरकरुणभयानकानामिति पृथगनैकांतिकत्वात्त्
तेमिलिता निर्दिष्टाः २ विभावादीनां पृथक्पृथङ्निर्देशेन प्राधान्येन एकस्मिन्नेव रसे कार्यस्य धारणत्वप्रमाणाभावात्र्यापि दर्शनाद
नैकांतिकत्वं पक्षसपक्षविपक्षेषु वर्तमानत्वादेतासामसाधारणत्वरसनिष्पत्तौ हेतुत्वमिति भावः तथाहि व्याघ्रादयो मोहनाभयोद्दी
पकत्वेन भयानकविभावाः वीराणामुत्साहवर्धनेन वीरविभावाः अपूर्वदर्शितमानमायो दोषदर्शनाद्भुतविभावाः अपकृतानां क्रो
धविभावना रौद्रविभावाः तथैव विप्रलंभशृंगारेऽपि प्रियप्राप्त्युपायविमर्शनात्मकचिंताव्यभिचारित्वेन पोषिका तथैव वीरस्य
यादीनां चिंता करुणे दीनोपकारादीनां चिंता भयानके भयहेतोर्निवारणोपायचिंतेति तथा च प्रतिरसं व्यभिचारिणोऽग्रे दर्शि
ते इत्यतो नैकांतिकत्वपरिहाराय मिलिता निर्दिष्टास्तत्र च सदैवोपयोग्यासंभवे कारणानेकत्वमिति फलितमित्यर्थः २ ननु विभावानुभाव
व्यभिचारिणां क्वापि काव्ये कस्यचिद्द्वयोर्वा सद्भावे रसोद्भवः समुदितानां वा किमेतेन तत्कार्यमित्यतः किंचासमुदितानामप्याशंक्याह ३ विबद्दलि

का॰टी॰
२७

यिकाः स्युर्दक्षिणाद्याश्च नायकाः चंद्रचंदनरोलंबरुताद्युद्दीपनं मतं भ्रूविक्षेपकटाक्षादिरनुभावः प्रकीर्तितः त्यक्त्वौग्र्यमर
णालस्यजुगुप्सा व्यभिचारिणः स्थायी भावो रतिः श्यामवर्णोयं विष्णुदैवतः इति शृंगारलक्षणम् तद्भेदलक्षणम् दर्शन
स्पर्शनादीनि निषेवेते विलासिनौ यत्रानुरक्तावन्योन्यं संभोगोयमुदाहृत इति २ एतद्भेदोदाहृतानि ३ यथा शून्यं वासगृहं वि
लोक्य शयनादुत्थाय किंचिच्छनैर्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम् विस्रब्धं परिचुंब्य जातपुलकामालोक्य
गंडस्थलीं लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुंबिता १ अत्र नायिकालंबनं शून्यं वासगृहमिति देशविशेष उद्दीपनं
चुंबनमनुभावः लज्जाहासौ व्यभिचारिणौ एभिरभिव्यक्तो रतिभावः सहृदयेषु चित्तद्रावणात्संभोगशृंगाररसतामेति २
तथा तेनस्नानाद्धि विनैव कंचुलिकया धत्से मनोहारिणीं लक्ष्मीमित्यभिधायिनि प्रियतमे तद्वीटिकासंस्पृशि शय्योपा
न्तनिविष्टसस्मितसखीनेत्रोत्सवानंदितो निर्यातः शनकैरलीकवचनोपन्यासमालीजनः तथा संभोगशृंगारप्रकारौ
व अत्र नायकश्चालंबनं वीटिकाया वस्त्रग्रंथेः संस्पर्शोऽनुभावः स्मितहर्षौ व्यभिचारिणौ अनक्तोपि रहः प्रदेशः सखीनिर्या
णमित्येतावुद्दीपने पूर्वत्र नायिकालंबनमत्र तु नायकस्यैव विशेषः २ अपरस्त्वभिलाषविरहेर्ष्याप्रवासशापहेतुक
इत्येवं पंचविधः १ अपरो विप्रलंभो लक्षणं चास्य भावो यदा रतिर्नाम प्रकर्षमधिगच्छति नाधिगच्छति चाभीष्टं विप्रलंभ
स्तदोच्यते इति तत्राभिलाषपदेन पूर्वरागोक्तिः तथाहि श्रवणाद्दर्शनाद्वापि मिथः संरूढरागयोः दशाविशेषः प्राप्तौ
यः पूर्वरागः स उच्यते अभिलाषश्चिंतास्मृतिगुणकथनोद्वेगसंप्रलापाश्च उन्मादोथ व्याधिर्जडता मृतिरिति दश चात्र कामदशा
दशा २ विरहपदेनायोगः तत्रायोगोनुरागेपि नवयोरेकचित्तयोः पारतंत्र्येण दैवाद्वा विप्रकर्षादसंगमः अतएवायमत्रोन्न
नीतस्तुदाहरणोपयाविरहोत्कंठितेयमत्र तु प्रोषितपतिकेति भावः तथा चानयोर्लक्षणं आगंतुं कृतचित्तोपि दैवान्नायाति य

34

णामिति प्रसादश्च निर्व्यभिचारिभिः केवलैरन्यैरपि स्यात् अथ तेनालंबनविभावो नायकः उद्दीपनविभावस्तु तदपराधप्रकाशकः का
लादिर्ज्ञायते तथैव औत्सुक्येन स्थानभावो दीर्घनिःश्वसितादि श्रीउद्यानं त्वगोपनं भ्रूलिखनादि दृष्टिप्रेमो चालिंगनादिर्व्यंज्यते
यथा च कोपास्पदयोरन्योन्यमेदस्पष्टरनेव वक्ष्यते तथा हि अत्र प्रसादे निर्व्यभिचारित्वस्य मानापगमनात्मनः प्रसादो हर्षः स्यादित्यु
क्तरीतीत्याद् हर्षवाचकमिति यथा कोपि सूर्ययोरेकल्पितत्वेपि कश्चिद्विशेषस्तथा चित्तस्य स्वस्थत्वसंवेदनं हर्षः अपकारादिस्म
मृत्यकालश्चापगमस्तु प्रसाद इति हर्षप्रसादयोर्भेदः अपि चौत्सुक्यश्रीगर्वैत्यादिवत्कश्चिद्वीडाहर्षनाशयुक्तिः श्रीआदी
नाविवर्णनादि निजनिजकार्याभिव्यक्तितानां सहैवाश्रय तत्तत्साधारणाद्भावितस्योत्सुक्यस्य त्यागायेति २ श्रीः एवं रसस्य
मानयतो निरूप्य विशेषमवतारयितुकामः पूर्वमाह १ तद्विशेषानाह शृंगारहास्यकरुणवीररौद्रभयानकाः बीभत्साद्भुतशान्तो
चेत्यष्टौ नाट्ये रसाः स्मृताः १ तस्य सामान्यतो निरूपितस्य रसस्य विशेषा भेदाः अत्र स्यात्वकृतिनीरसमित्येवलक्षणोद्देशप्य
भिनयात्मके दृश्यनाट्ये शान्तेवरसः शान्तस्याभिनयासंभवात् अद्यैतत्काव्येष्वपि नवमो रसः स्यादित्यत्र प्रतिपादनार्थे नाट्यप
दे तथा चोक्तम् नाट्यालंकारे रत्युत्साहजुगुप्साक्रोधो हासः स्मयो भयं शोकः शममपि केचित्प्राहुः पुष्टिर्नाट्येषु नैतस्य
शमो हि समस्तव्यापारः --- विलयरूपस्तस्य चाभिनयायोगादिति भावः तदुक्तम् नयत्र दुःखं न सुखं न चिन्ता न द्वेषरागौ न
च काचिदिच्छा रसः स प्रशान्तः कथितो मुनीन्द्रैः सर्वेषु भावेषु शमप्रधानः २ तत्र शृंगारस्य द्वौ भेदौ संयोगो विप्रलंभश्च तत्राद्यः
परस्परावलोकनपानपरिचुंबनाद्यनंतभेदत्वादपरिच्छेद्य इत्येक एव गण्यते २ तत्र रसानामाद्यत्वात् शृंगारः संयोगविप्रलं
भात्मकतया द्विधा तत्र द्विविधे शृंगारे प्रथमः संभोगाख्यः नायकविषयत्वापरिच्छेद्यत्वात् तथा चेत्स्त्रीणामन्यतरेषु रम्यदेशक
लाकालवेषभोगादिसेवनैः प्रमोदात्मा रतिः सैव यूनोरन्योन्यरक्तयोः प्रकृष्यमाणा शृंगारो मधुराकृतिर्विचेष्टितैः आलंबनना

शापतः प्रथमे प्रणयसमये सख्योपदेशं विना नो जानाति सविभ्रमांगवक्रोक्तिसूचनम् स्वच्छैरच्छकपोलमूलगलितैः पर्यस्तनेत्रो-
त्पला बाला केवलमेव रोदिति लुठल्लोलालकैरश्रुभिः १ मानस्य भावः कर्म वा मानस्यं तेनोपदेष्टुः मानोपदेष्टुः अत्र पत्युरन्यासंग-
दर्शनादीर्ष्यामानः एवं चात्र नायकेनालंबनेन तेष्यासमयेन चोद्दीपनेन ईर्ष्यायामभिचारिणास्रुभिरनुभावैः प्रकर्षं नीता ना-
यिकाया रतिरभीष्टानां प्रियालिंगनादीनामनधिगमात्सुहृदयेषु विनष्टा मानाख्यविप्रलंभरसतामभजते २ प्रवासहेतु-
कमुदाहरति ३ प्रस्थानं वलयैः कृतं प्रियसखैरस्रैरजस्रं गतं धृत्या न क्षणमासितं व्यवसितं चित्तेन गंतुं पुरः गंतुं निश्चितचेत-
सि प्रियतमे सर्वे समं प्रस्थिता गंतव्ये सति जीवित प्रियसुहृत्सार्थः किमु त्यज्यते १ अत्र भावी प्रवासः नायकेनालंबनेन तत्स-
मयेन चोद्दीपनेन प्रस्थानं वलयैः कृतमिति तामयाकृशतया अस्रैरजस्रं गतमित्यश्रुभिरनुभावैः धृत्या नेति चपलतया
व्यवसितमिति वितर्केण गंतुमित्यादि दैन्येन जीवितेत्यायस्यानामंत्रणानमितेनोन्मादेन च पुष्टिं नीता नायिकाया रतिः सा प्रि-
यप्रवासहेतुकयाभीष्टानां प्रियदर्शनादीनामनधिगमशंकया प्रवासाख्यविप्रलंभरसतया द्युतिकारणात्सहृदयेषु सदते २
शापहेतुकमुदाहरति ३ त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायामात्मानं ते चरणपतितं यावदिच्छामि कर्तुम् अस्रै-
स्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे क्रूरस्तस्मिन्नपि न सहते संगमं नौ कृतान्तः १ अत्र कान्तालंबनेन चित्रलिखितमुद्दीपनेनेच्छा-
मीति मतिर्व्यभिचारी अस्रैरेवानुभावः एभिरभिव्यक्ता नायकस्य रतिरिष्टस्य प्रियापादस्पर्शस्यानाप्तेः विप्रलंभतामभजते अपि
चात्र चित्रदर्शनसानाकृतायाः कान्ताया भावनोपनीताया अभिन्नदेशत्वे जातेऽपि कृतान्तो दैवसिद्धान्तयमाकुशलकर्मस्विति
वचनात् कृतान्तस्याकुशलकर्मपर्यायस्य शापरूपस्य हेतुत्वमेवेष्टस्य तच्चरणस्पर्शस्याप्राप्तौ हेतुरिति शापहेतुकोऽयं विप्र-
लंभः तथा चोक्तं विस्तरिकायां एकशयनस्थयोरपि कोपादिप्रबंधे विप्रलंभः विदेशस्थयोरपि दूतीसंप्रेषणादौ संभोगः

न्प्रियः तदनागमदुःखार्त्ता विरहोत्कंठितेति सा नानाकार्यवशाद्यस्या हृदयेशो गतः प्रियः सा मनोभवदुःखार्त्ता भवेत्प्रोषितभर्तृकेति २
ईर्ष्योपदेन मानः तथाहि मानः कोपः स तु द्वेधा प्रणयेर्ष्यासमुद्भवः द्वयोः प्रणयमानः स्यात्प्रमोदे सुमहत्यपि प्रेम्णः कुटिलगामि
त्वात्कोपो यः कारणं विना पत्युरन्यप्रियासङ्गे दृष्टे वानुमिते श्रुते ईर्ष्यामानो भवेत्स्त्रीणां तत्र त्वनुमितिस्त्रिधा उत्स्वप्नायितभो
गाङ्कगोत्रस्खलनसंभवेति ३ प्रवासो भिन्नदेशत्वम् ४ एकदेशस्थयोरपि मन्यादिकोपान्नियन्त्रणाशापः निवृत्तदर्शनस्य
प्रीत्याद्यभावः ५ एतदेव दर्शयति १ क्रमेणोदाहरणम् प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढरागोदयास्तास्ता मुग्धदृशो
निसर्गमधुराश्चेष्टा भवेयुर्मयि यास्वन्तःकरणस्य बाह्यकरणव्यापाररोधी क्षणादाशंसापरिकल्पितास्वपि भवत्यानन्दसान्द्रो
लयः १ अत्र मालतीसाक्षाद्दर्शनप्ररूढरागस्य माधवस्याभिलाषेण प्रकर्षं नीतः पूर्वरागाख्यो विप्रलम्भः तथाह्यत्र माधवह
शाविभावेन तच्चेष्टाभिरनुभावैः आशंसापरिकल्पितास्वितिनासैः स्मृत्यादिभिर्व्यभिचारिभिः प्रकर्षं नीता माधवस्य रतिर
भीष्टस्य प्रियालिङ्गनादेरलाभे तस्यामात्महृदयेशु चिन्तया पूर्वरागाख्यविप्रलम्भतामापादितेति २ एवमभिलाषमुदाहृत्य विर
हमुदाहरति १ अनवच्छिन्नतीतिकाखेलकथानामप्यनादृत्य हृदयेशो मानेच्छितिनागतः स हृदयाकोपविपर्ययः प्रक्रमः कमले
तरकल्पनाकवलितस्वान्तानि शोभोऽमरेणालापव्याकृतिविवर्तनमनिकरानाम्नो निनिद्रानितिष्ठा एषा विरहोत्कंठिता अत्र नवयोः
कयोश्चिन्नायकयोरनुरागिणोरप्रवासिनोरपि रुद्ध्यापारतयाहितादिविप्रकर्षाद्यो नाम्नो विप्रलम्भः अत एवैष विरहोत्कं
ठितेत्युक्तम् तथा चात्र नायकेनालेखनेनायोगकालेन दीपनेन अनवच्छिन्नलीलाहि मम्यालापस्मनादृत्यादिवितर्कै
णानागतस्य हृदयेशस्येति चिन्तया चेति व्यभिचारिभिः स्मृत्युत्तरेण्याहिताधिकाचेष्टाभिरनुभावैः प्रकर्षं नीता नायिकाया रतिरभी
ष्टानां प्रियसंगमादीनामनधिगमात्महृदयेशु चैतसोऽद्रवणाद्यो मानाख्यो विप्रलम्भरसतामापन्नेति २ ईर्ष्याविप्रलम्भमुदाहरति १

वनंमतम् तत्कर्माणिभवान्त्यूपाद्याणामवंमृदीपनाइद् अनुभावोदैवनिंदाविलापःस्वस्तगात्रता श्वासःकोपातंभूपातनयनोरस्ताडनानि च
स्वप्नशोषविवर्णत्वरोदनाद्याःप्रकीर्तिताः अत्राशौत्सुक्यमाह्निकाल्पव्यतिनिर्वेदग्लानिदीनताः चिन्ताविषादऔत्सुक्यचापलोन्मादस्तथैव:
आलस्यापस्मृतिव्याधिमूर्च्छाद्याव्यभिचारिणः रौद्रंदर्शयति १ कृतमनुमतंदृष्टंवायैरिदंगुरुपातकं मनुजपशुभिर्निर्मर्यादै
र्भवद्भिरुदायुधैः नरकरिपुणासार्धंतेषांसभीमकिरीटिना मयमहमसृङ्मेदोमांसैःकरोमिदिशांबलिम् १ अत्रद्रोणाचा
र्यवधाद्यपकारिणोर्जुनादीनालंबनत्वात्क्रोधस्थायिनःक्रोधःस्थायीवागारंभरामैःप्राप्तोद्यमनाद्युद्दीपनैः प्रतितत्त्वयाचानुभा
वेन अयमहमित्यन्यानपेक्षागर्वेणव्यभिचारिणाचपुष्टिंनीतःसहृदयेषुतिप्रायेनविनर्यालनाद्रौद्ररसीभवति रौद्र
रसलक्षणंच रौद्रःक्रोधस्थायिभावोरक्तोरुद्राधिदैवतः आलंबनमरिस्तत्रतच्चेष्टोद्दीपनंमतम् सोल्लुंठहासवक्रोक्तिकृता
तान्ताद्यादयः आदिपदेनमुष्टिप्रहारपातनविकृतच्छेदसंग्रामसंपादयः दन्तनिष्पेषणंदंतपृष्ठतेत्ररक्तता रक्तेनोष्ठस्फूर्तिर्भ्रुकु
टीभुजास्फालनताडनाः तसीलतानतमासंवृतिः स्वात्मोद्भवनदर्षिता भत्समनमूर्धविधूतिः दगतेपाटलछविः भ्रूभेदपरके
पाद्याश्चनुभावाउद्दीरिताः आवेगोऽत्रउग्रतागर्वौनिर्वेदोमोहचापले असूयोत्कतथामर्षश्रमाद्याव्यभिचारिणः आदिपदेन
सर्वेस्तंभादयःसात्त्विकाः वीरमुदाहरति १ क्षुद्राःसंत्रासमेतेविजहतहरयोभिन्नशक्रेभकुंभायुष्मद्देहेषुलज्जांदधतिपरममी
सायकानिष्पतंतः सौमित्रेतिष्ठपात्रंत्वमसिनहिरुषांनन्वहंमेघनादः किंचित्संरंभलीलानियमितजलधिंराममन्वेषयामि
१ अत्ररामआलंबनोऽत्रउदग्रिनाउत्साहस्थायिभावः तदेकरूपतत्तेनरामस्वर्धयाचानुभावेन अवज्ञाद्यतीतिगम्येनगर्वेणव्य
भिचारिणाचपोषितःसहृदयेषुचित्तस्यविस्तारतत्पज्वलनत्वेनवीररसतामजते तथाचैतल्लक्षणम् कार्यारंभेषुसंरंभःस्थेया
नुत्साहउच्यते उत्तमप्रकृतिर्वीरउत्साहस्थायिभाववान् आलंबनविभावस्तु विजेतव्यस्तथामतः विजेतव्यस्यचेष्टास्तत्तस्योद्दी

तस्माद्यदवदर्पणकारेण सच पूर्वरागमानप्रवासकरुणात्मकश्चतुर्धा स्यादित्यत्र प्रवासो भिन्नदेशत्वं शापात्कार्याच्च संभ्रमादिति
विरहशापहेतुकयोः प्रवासएवान्तर्भाव उक्तस्तच्चिन्त्यमेकदेशावस्थानात् तदित्थं प्रतिभूतविभावानुभावव्यभिचारिभिराल
मुदाहरणप्रपञ्चः पृथक्पृथग्ग्रन्थानिश्रियाग्रह्याद्ववोध्यः एवं केचित्करुणशृङ्गारालोच्यषष्ठो भेद उक्तः तत्र करुणस्य भूता
र्थेनिरस्तमेव काव्यतत्त्वविद्भिः मान्याशा चेत्प्रवासविप्रलम्भएवायं नचेत्करुणरसएवेति गतार्थमिदम् सर्वथा रतेरुच्छे
दादिति हास्यादीनां क्रमेणोदाहरणम् आकुञ्चय पाणिमशुचिं मम मूर्ध्नि वेश्या मन्त्राम्भसां प्रतिदिनं पृषतैः पवित्रे तारस्वरं प्रथि
तफूत्कमदात्प्रहारं हाहाहतोहमिति रोदिति विष्णुशर्मा १ अत्र वेश्यागामनन्तरागिणामालम्बनविभावे विष्णुशर्माणं तथैव
वेश्यया प्रहृत्य निष्कासितं रुदन्तमवलोक्य कस्यचित् हृदयहरणस्य त्र श्रोतोर्विकासरूपो हासः स्थायिभावः तदीयरोदनपश्चा
त्तापाद्यैरुद्दीपनैरुद्दीप्यमानः तदीयैरेव वागारम्भरागैः प्रकाशितत्वाद्गद्गदादिभिः पुष्टिं नीतो माधुर्येण हास्यरसतामभज
त तथा च हास्यलक्षणम् विकृताकारवाग्वेषचेष्टादेः कुहकाद्भवेत् हासो हासस्थायिभावो हि धाससपरगोचरः विकृता
कारवाग्वेषमालोक्य हसेज्जनः तदत्रालम्बनं प्राकृतलक्षणमुद्दीपनं तथा अनुभावोऽक्षिसंकोचवदनस्मेरतादयः निद्रा
लस्यश्रमग्लानिमूर्छाद्या व्यभिचारिणः आदिशब्देनावहित्थाच करुणमुदाहरति २ हा मातस्त्वरितासि कुत्र किमिदं हा
देवताः क्वाशिषो धिक्प्राणान्पतितोऽशनिर्हुतवहस्तेऽङ्गेषु दग्धे दृशौ इत्थं घर्घरमध्यरुद्धकरुणाः पौराङ्गनानां गिरश्चित्रस्थान
पि रोदयन्ति शतधा कुर्वन्ति भित्तीरपि ३ अत्र काचिद्राजमहिषी मृतामालम्ब्योऽत्र तन्मातृजनस्य शोकः स्थायीतदुपतस्कैरव
वह्निसंयोगाद्यैरुद्दीपनैरोदनेनानुभावेन तदीयैर्दैन्यग्लानिमूर्छाद्यैर्व्यभिचारिभिः पुष्टिं नीतः सहृदयेषुतिप्रायेन क्रविकारणा
त्करुणरसतया स्वदते तथा चास्य लक्षणम् इष्टनाशादनिष्टाप्तेः करुणाख्यो रसो भवेत् शोकोऽत्र स्थायिभावः स्याच्छोच्यमाल

का॰टी॰ अतस्तत्तन्न्यूनतातेषामत एवावधारणम् अस्यार्थः मनसः काव्यार्थेन विभावादिसमूहालंबनात्मकवाक्येन सह संभेदः संयो-
३२ गो विमर्शरूपस्तस्माद्धेतोस्तस्मान्तदसंभेदः अकालं विगलितवेद्यान्तरतया मुक्तिसुखेन सदृशः यः स्वादो रसस्य चर्वणीयतेति
मनसः शृङ्गारविमर्शाद्विकासप्रमोदप्राप्तस्य भवति वीरविमर्शाद्विस्तरसंयोगप्राप्तस्य भवति बीभत्सविमर्शात्क्षोभमत्तालि-
प्राप्तस्य रौद्रविमर्शाद्विक्षेपव्याकुलताप्राप्तस्य भवति एवमनेन क्रमेण द्वाभ्यां मनसो विकासः अद्भुतेन विस्तारः भयानकेन क्षोभः
करुणाद्विक्षेपः अत एव हेतोस्तत्तन्न्यूनता शृङ्गारादिजन्यतानेषां हास्यादीनाम् अत एव मनसो वृत्तिचतुष्टयस्य हेत्वादत्रावे
त्यवधारणमवच्छेदः तथा चोक्तं शृङ्गाराद्धि भवेद्धास्यो रौद्राच्च करुणो रसः वीराच्चैवाद्भुतोत्पत्तिर्बीभत्साच्च भयानकः इति
अथ च यद्यपि करुणादिकाव्यश्रवणादिकाव्यश्रवणादिष्टनाशादिना सहृदयानां दुःखविर्भावो दृश्यते तथापि वर्ण्य-
नचमत्कारात्स्वसंवेदनत्वात्सुखोत्पत्तिः प्राय एव यथा स्त्रीणामवहेलनादेरपातनः संभवन्त्यामपि वेदनायां सुरते सुखोत्पत्तिः प्राय एवेति
तथा च बीभत्सलक्षणम् जुगुप्सास्थायिभावस्तु बीभत्सः कथ्यते रसः दुर्गन्धिमांसरुधिरादिकमालंबनं मतं तत्रैवक्रिमि
पातादिरूपा भवेदुद्दीपनं पुनः निष्ठीवनास्यवलननेत्रसंकोचनादयः अनुभावास्तत्र मतास्तथा स्युर्व्यभिचारिणः मोहापस्मा-
रआवेगो व्याधिश्च मरणादयः अथाद्भुतस्वरूपमाह इति चित्रमहानेषविकारः कर्कोतिरेखामिनेवद्वमतिः लोकोत्तरेऽर्थेम-
हाप्रभावः काव्यकृतिः सूनतत्पदमर्गः १ अत्र महापुरुषदर्शनाद्युत्पन्नो विस्मयः स्थायी महापुरुषेणालंबनेन तद्गुणा-
नित्राय्येनोद्दीपनेन वक्रवीणारंभानमितेः मतिधृतिहर्षाद्यैः संचारिभिरभिव्यक्तः सहृदयानां चेतसो विस्तारात्मकरी-
तिजननादद्भुतरसतामजनते तथा चास्य लक्षणम् अतिलोकैः पदार्थैः स्याद्विस्मयात्मा रसोऽद्भुतः विस्मयः स्थायिभावोऽस्य
वक्ता लोकातिगः पुनः आलंबनं तस्य गुणमहिमोद्दीपनं पुनः निर्निमेषतया वीतारोमांचः साधुवाचनम् अनेकाचः पीरी ३२

पनकारिणः अनुभावास्तनयस्पर्शः सहृदयान्वेषणादयः संचारिणस्त्वधृतिमतिस्मृतिवितर्कै मोचाः सचदानयमिथुद्देश्ययाल
मन्वितेऽस्त्वनुपीस्यात् भयानकमुदाहरति । ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः पश्चार्धेन प्रविष्टः शरपतनभ
याद्भूयसा पूर्वकायम् दर्भैरर्धावलीढैः श्रमविततमुखभ्रंशिभिः कीर्णवर्त्मा पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमु
र्व्यां प्रयाति । अत्र स्यन्दनमालम्बनं तत्र मृगस्य भयं स्थायिभावः श्रमेणाभिचारिणा पुष्टिः पश्चाद्ग्रीवादिवाच्येन पलाय
नेनानुभावेन प्रकटीकृतो रसिकमनःसु भयानकतया स्वदते तथा च भयानकलक्षणम् रसः प्रोक्तो भयस्थायिभावो विगे
भयानकः आशरत्तः प्रावोलूकभल्लूकारणदर्शनम् शून्यागारे निवासश्च वने भूतावयतेऽयने आलम्बनविभावाः स्युः स्फुराय
तावलोकिताः आक्रोशादिवचसा विकृतरूपस्वराणां स्ववेषाग्रहणम् वेपथोरनरानस्यमवेद्दुदीपने पुनः अनुभावेऽत्रवे
वर्णमदस्वरभाषणाम् पुलकस्वेदरोमाञ्चकम्पदिक्प्रेक्षणादयः तमरव्यावेगसमोहसंत्रासग्लानिदीनताः शङ्कापस्मार
संभ्रान्तिमृत्याद्या व्यभिचारिणः बीभत्समुदाहरति । उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूच्छोफभूयांसि मांसान्यंसस्फिक्पृ
ष्ठपिण्ड्याद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा आर्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्कादङ्कस्थादस्थिसंस्थं स्थपुटग
तमपि क्रव्यमव्यग्रमत्ति । अत्र शवकव्यमदने प्रेतपुरुषः शुचिमांसं विभावमालम्बनं तत्र जुगुप्सा स्थायिभावः मांसकर्त
नाद्यैरुद्दीपितः इह वीरारम्भानमितनासानिकोचादिभिरनुभावैरुद्वेगादिभिर्व्यभिचारिभिश्च पुष्टिं नीतः सहृदयानामनिशाये
नचिन्नत्वलनपूर्वं बीभत्सरसतया चमत्करोति बीभत्सादेरपि भक्तादिनमलौकिकत्वेन निरूपितं प्राक्तावे सार अमत्कारः
स च सर्वरसाश्रय इति तथा चाह्लादकत्वं माधुर्यमित्याद्युक्तमोक्ष्याम एव वक्ष्यति उक्तं चान्यैः स्वादः काव्यार्थसंभेदादात्मानन्दसमुद्भ
वः विकासविस्तरक्षोभविक्षेपैः स चतुर्विधः शृङ्गारवीरबीभत्सरौद्रेषु मनसः क्रमात् हास्याद्भुतभयोत्कर्षकरुणानां त एव हि

का.टी.
३८

निर्वेदग्लानिशङ्काख्यास्तथासूयामदश्रमाः आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः व्रीडा चपलता हर्ष आवेगो जडता तथा गर्वो विषाद औत्सु-
क्यं निद्रापस्मार एव च सुप्तं विबोधोऽमर्षश्चाप्यवहित्थमथोग्रता मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च त्रासश्चैव वितर्कश्च विज्ञेया
व्यभिचारिणः तथा चैतल्लक्षणमुक्तं महतीति विप्रयोगेर्ष्यासद्विवेकादिकल्पितम् स्वावमाननमेवात्र निर्वेद इति कथ्यते ओजःसो-
मात्मकदेहे बलपुष्टिकृद्रसस्तत्क्षयाः श्रमाध्वरत्याद्यैर्ग्लानिर्निष्प्राणता मता कंपागानाशुवैवर्ण्यकर्ष्याद्यनुभवमात्रादिकृत् २ स्वी-
यचौर्यापराधादेः परक्रौर्यादितस्तथा स्वानिष्टोत्प्रेक्षणं यत्तु सा शङ्केत्यभिधीयते कंपास्यशोषवैवर्ण्यादिकृत्तालीनतादयः ३ द्वे-
षः परोदये सूयास्यात्सौभाग्यगुणादिभिः तत्रेर्ष्यानादरापेक्षादोषारोपगुणोष्वपि अपचतिस्तिरोवीक्षाभ्रुवोर्भंगस्तथादयः ४
विवेकहरसोल्लासो मदः सद्विधो मतः मधुपानभवोनेनाविक्रियासंभवोपि च गत्यंगवाणीस्खलनदृग्घूर्णाहसितादिकृ-
त् ५ अध्वव्यायामरत्याद्युत्थः खेदः श्रमः स्मृतोस्मिन् निश्वासहंगसंमर्दनजृम्भास्वासादिभाग्यसौ ६ सामर्थ्यस्याप्रसद्भावे क्रियानुत्सा-
हता हि या तृप्तिश्रमादिसंभूता तदालस्यमुदीर्यते अत्राङ्गभंगोन्माचक्रियाद्वेषोक्तिमर्दने प्रायासनैकप्रियतातंद्रानिद्रादयोपि
च ७ दुःखदारिद्र्यापराधाद्यैरनौर्जित्यं स्वदीनता चाटुहन्मांद्यमायमालिन्यचिन्तामनुद्रिमादिकृत् ८ ध्यानं चिन्ता भवेदिष्टानाप्तानिष्टा-
प्तिनिर्मितं श्वासाधोमुखभूलेखवैवर्ण्यनिद्रतादिकृत् विलापोत्तापकृशतावाष्पदैन्यादयोपि च ९ मोहो हृन्मूढता दुःखाद्भयाद्वेगाद्वि-
चिन्तनात् तथा विषादादेश्च तत्र स्याद्देहसपतनं भवि शून्येन्द्रियत्वं भ्रमणं तथानिश्चेष्टतादयः १० यास्यान्नर्मानुभूतार्थप्रतीतिः सदृशे-
क्षया दृढाभ्यासादिना वापि स्मृतिः सा परिकीर्तिता भवेदत्र शिरःकंपोभ्रूविक्षेपादयोपि च ११ धृतिः स्याज्ज्ञानलाभाद्यैर्दुःखाभा-
वे तथाप्तिभिः सौहित्यवदनोल्लाससहासप्रतिभादिकृत् १२ नवीनसंगमाकार्यस्तवावज्ञादिना कृता अधृष्टता भवेद्व्रीडा तत्र मौ-
नविचिन्तनम् अवगुंठनभूलेखानतास्यत्वादयः १३ रागद्वेषादिभिश्चित्तलाघवं चापलं मतम् अत्राविचारणारुष्यलाक्षे ३८

38

रसहर्षः चेतोचलभ्रमः अनुभावः अपलेभस्वेदरोमांचगद्गदाः आवेगहर्षजाड्यस्यावयवस्तु व्यभिचारिणः तथा चाङ्गतोदाहरणेना
गानेदे ग्लानिर्नाधिकपीयमानरुधिरस्य व्यक्तिर्धैर्यदयं भीसोत्कंठा [illegible] निकृन्ततः प्रीत्याप्रसज्जनस्तूम् गाढयन्त्रविलम्बमे
षपुलकस्तनस्फुटोल्लसने हर्षेभिपुपकारिणीविनिपतनस्यापकारिणपि सर्वस्यैवकामस्यपरमार्थ्यतस्त्रमतकावेकादमे
देसत्यपि स्थायिभेदाद्भुत्यादिभेदेनभेदइतिस्थायिनःप्राह १ रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयंतथा जुगुप्साविस्मयश्चेति
स्थायिभावाःप्रकीर्तिताः २ निवृत्तिरसचर्वणापर्यंतस्थायी तथाचभरतः रसचर्वणापर्यंतयस्य स्थायोव्यभिचारिणः आविःसए
भावउच्यते अविरुद्धैर्विरुद्धैर्वायो भावो न व्यवधीयते आत्मभावं नयत्यन्यान् सस्थायी [illegible] भाव एव स्थायी
भावइच्यते अविरुद्धैरपिस्यशाभावाः संचारिणोखिलाः मग्नमग्ना विलीयंते तेनासौ स्थायिता ततः अष्टौ रत्यादयस्त्वेतेतेले
नीताःसपुष्टताम् समस्येषु स्थायिनांपर्तिहर्षितिमेभोवितन्वते अपुष्टानामेवभावानांसंस्कारानन्तरं स्थायिनो मताइति तथा चैषां
विशेषलक्षणानि मनोनुकूलेष्वर्थेषुसुखसंवेदनंरतिः १ चेतोविकासोहासःस्याद्वाग्वेषा
हादिवैकृतात् सहास्विकासनासोत्फुल्लकपोलस्पंदनादिकृत् २ शोकइष्टवियोगाद्येश्चित्तक्लैव्यभरःस्मृतः विलापपातनिःश्वा
सवैवर्ण्यभ्रमादिकृत् ३ प्रातिकूल्यादिभिश्चित्तज्वलनं क्रोधउच्यते पारुष्यभ्रुकुटीनेत्रलोहित्यादिविकारकृत् ४ स्थेयसी
साधुभिःश्लाघ्याफलेप्रह्वादिकर्मणि संरंभानंतरासक्तिरुत्साहइतिकीर्त्यते कालाद्यवेक्षणाधैर्यत्यागोद्यमादयः ५ भय
चित्तस्यवैक्लव्यंमतंरौद्रदर्शनादिभिः आत्मगोपनरूपशोषविद्रवभ्रमणादिकृत् ६ अनात्मसात्सादृष्यानुभवाच्चितनिमीलनम् नेत्र
निष्ठीवनवक्त्रकूणनांगकुंचनादयः ७ लोकोत्तरार्थवीक्षादेर्विस्मयश्चित्तविस्तृतिः अश्रुस्वेदरोमहर्षपुलकोत्फुल्लकादयः ८
अथस्थायिभावानुभावैःसहगम्यमानकत्वादनुभावानपेक्ष्यव्यभिचारिणएवनिर्दिशति १ व्यभिचारिणोत्रवे निर्वेदग्ला

दिगवलोकनम् अन्ये त्वातृष्णा चेष्टावारम्भणीत्यादिकाः क्रियाः २६ अपराधदुरुक्तादिजनितं चण्डत्वमुग्रता वधबन्धशिरःकम्पभर्त्सनो-
ताडनादिकृत् २७ शास्त्रादीनां विचारोत्थमर्थनिर्धारणं मतिः अत्र कर्तव्यकरणसंशयपरमर्शोच्छेदा उपदेशश्च शिष्याणाम् ऊ-
हापोहास्यापि च २८ दोषोद्रेकवियोगाद्यैर्व्याधयो ज्वरादयः इह तन्मयो व्याधिरिति अभिधीयते अत्र स्तम्भश्लथाङ्गतः श्वासो-
त्तापक्रमादयः २९ उन्मादश्चित्तसंमोहः प्रौढानन्दापदादिभिः अत्राहहसितमौनरुदितगीतनृत्यचेष्टितम् प्रलापधावनाक्रोशवि-
परीतक्रियादयः ३० विषादव्याधिसंत्रासमहारम्भादिभिः प्राणत्यागोन्मनितल्यासम्प्रकाशनं भाषणं विवर्णता च तनाश्च।
श्रमाद्यैरिह कारयः क्रियाः ३१ त्रासः क्षोभो हृदि तडिद्घोरसत्त्वोग्रनिःस्वनैः पार्श्वस्थालम्बरोमाञ्चकम्पस्तम्भभ्रमादिकृत् ३२
विमर्शात्संशयादेश्च वितर्कस्तूह उच्यते एवमुन्नेयाः शिरोऽङ्गुलिसंचालनादिकृत् ३३ त्रयस्त्रिंशदमी भावाः स्मृता व्यभि-
चारिणः १ अन्येऽसन्तोऽपि रसपोषकाश्चित्तवृत्तिविशेषरूपा भावाः एतेषामेवानुभावस्वरूपानुप्रवेशान्न पृथग्व्याख्यातास्त-
त्त्रयस्त्रिंशत्त्वमेषां न तु परेषामभावात् तथा चोक्तम् शारीरेन्द्रियवर्गस्य विकाराणां विधायिकाः भावा विभावजनिताश्चि-
त्तवृत्तय ईरिताः मात्सर्योद्वेगदम्भेर्ष्याविवेकाविनयक्षमाः क्षेमं तमा व कुतर्कश्च निर्णयोऽपि च संशयो धार्ष्ट्यमित्याद्या
भावा ये स्युः परेऽपि च उक्तेष्वन्तर्भवन्त्येते न पृथक्तेन दर्शिताः तथा हि असूयायां हि मात्सर्यं त्रासे चोद्वेग एव च दम्भस्तथावहि-
त्थायामीर्ष्यामर्षममता ह्युभौ विवेको निर्णयश्चैव धृतौ दैन्ये क्षमं तथा सा धृतौ औत्सुक्ये कुतर्ककोटि
संशयोऽन्तर्भवेत्तर्के तथा धार्ष्ट्यं तु चापले एषां संचारिभावानामप्येकस्य तु कस्यचित् विभावश्चानुभावश्च भवेद्व्यपरस्पर-
म् निर्वेदे तु यथेर्ष्याया भवेदत्र विभावता असूयायां पुनस्तस्याः क्रमेणैवानुभावता औत्सुक्यं प्रति चिन्तायाः कथिता त्वनु-
भावना निद्रां प्रति विभावत्वमेव बोध्याः परेऽप्यमी एषां च सात्त्विकानां च तत्तत्कार्यक्रियान्वितैः कार्यकारणभावस्तु ज्ञेयः प्राये-

39

ग्राचरणादयः २४ अभीष्टलाभादिना चेतःप्रसन्नता हर्षः स्याद्रोमाञ्च स्वेदोऽश्रुमुखफुल्लता आवेगोन्मादजडतास्तथा
मोहादयोऽपि च २५ चित्तस्य संभ्रमो यः स्यादावेगोऽयमसौ च पृथक् प्रियाप्रियमहद्दर्शनात् वह्निराजारिजः प्रियोत्थः पुलकस्नानवचा
पल्लाश्रुस्मरादयः अप्रियोत्थोऽत्र भूपातविक्रोशभ्रमणादयः वृष्टिजो धावनकृतगात्रसंकोचनादिकृत् उत्पाते स्खलवैवर्ण्य
विस्मयोत्कंपनादयः गजे पलायनोत्कंपत्रासपृष्ठेक्षणादयः अग्निजो धूमव्याकुलाक्षिप्रतापसरणादिकृत् २६ जाड्यमप्रतिपत्तिः
स्यादिष्टानिष्टश्रुतीक्षणैः विरहादिभ्योऽपि तन्मोहात् पूर्वावस्थापरापि च अज्ञाननिमिषनात् तूष्णीभाववित्मरणादयः सौभाग्यरूपता
रूपगुणसर्वोत्तमाश्रयैः स्पृहालाभादिना चान्यहेतुमनःग्रतुच्यते अत्र सोऽङ्गैष्ठनं वाक्यहेला नजरदायिना स्वारोत्तानिद्रतोऽन्यस्य
वचनाश्रवणादयः २८ इष्टानवाप्तिप्रारब्धकार्यासिद्धिविपत्तितः अपराधादितो विषादस्तत्तापो विषादो ना अत्रोपायसहा
यान्वेषणं निश्वासोच्छ्वासचिन्ताचरोदनम् विलापश्वासवैवर्ण्यमुखशोषादयोऽपि च २९ कालाक्षमत्वमौत्सुक्यमिष्टप्राप्तिस्पृहादिभिः मु
खशोषत्वराचिन्तानिःश्वासास्थिरतादिकृत् ३० चित्तालस्यनिसर्गक्लमादिभिश्चित्तमीलनं निद्रा तत्र जृम्भांगभंगनेत्रमीलनश्वासो
च्छ्वासमीलनानि स्युः ३१ दुःखोत्थापातवैवस्याङ्गज्वरि[illegible]विकारः अपस्मारोऽत्र पतनकम्पावनास्योद्गमश्वासः कंपः फेनस्त्रुति जिह्वा
हृत्क्षेपविक्रोशनादयः ३२ स्वप्नो निद्रास्वपनं स्यात् विषयानुभवस्तु यः इन्द्रियोपरति श्वासनेत्रनिमीलनादिकृत् ३३ अविद्या
मोहनिद्रादिध्वंसाद्बोधः प्रबुद्धता अविद्याध्वंसनो बोधो विद्योदयपुरःसरः अशेषलोकशान्तिश्चान्तिस्वरूपवगमादिकृत् बोधो
मोहक्षयाच्छब्दगन्धस्पर्शरसैरिह नेत्रोन्मीलनरोमाञ्चप्रत्याख्यानादिकृद्भवेत् अविस्मितादिभिर्निद्राध्वंसाद्बोधप्रबन्धयोर्भवेत् न
त्रादिमर्दनपृथ्वीमोटनाङ्गवलनादयः ३४ अधिक्षेपापमानादेः स्यादमर्षोऽभिनिविष्टता तत्र स्वेदः शिरःकम्पो विवर्णतो विचिन्त
नम् उपायान्वेषणाक्रोशावेगरोषोत्ताडनादयः ३५ अवहित्थाकारगुप्तिर्लज्जाभ्यो नवकेन चित् अत्रांगादेः परामर्शस्थानस्यापि

का॰टी॰
४॰

लाश्रयः तेनस्युः स्तंभस्वेदौ वैवर्ण्यप्रलयौ विषयाश्रितः त्वक्स्थाएवक्रमांमनस्यप्यनीत्रनमेदभाक् रोमांचकंपवैस्वर्याण्येवत्रयःशरीरतो
त्पत्तौ वहिरंतश्चविलोभविधायितादतःस्फुटम् प्रोक्तानुभावतामेषांभावताचमनीषिभिः तथाचविशेषलक्षणम् स्तंभः१ष
भयाश्चर्यविषादामर्षसंभवः तत्रवागाहित्यादि नैश्चल्यशून्यतादयः १ स्वेदोहर्षभयक्रोधादिजः क्लेदकरस्तनो २ रोमांचो
यं किलाश्चर्यहर्षोत्साहभयादिजः रोमणामभ्युद्गमस्तत्रगात्रसंस्पर्शनादयः ३ विषादविस्मयामर्षहर्षभीत्यादिसंभवम् वैस्वर्य
स्वरभंगःस्यादेषगद्गदतादिकृत् ४ वित्रासामर्षहर्षाद्यैर्वेपथुर्गात्रलौल्यकृत् ५ विषादरोषभीत्यादेर्वैवर्ण्यंवर्णविक्रिया
वक्त्रेस्त्रमालिन्यकार्श्याद्याःपरिकीर्तिताः ६ हर्षरोषविषादाद्यैरश्रुनेत्रजलोदयः हर्षजेत्वश्रुणिप्रीततमोरोषादिसंभवे
सर्वत्रनयनक्षोभगात्रसंमार्जनादयः ७ प्रलयःसुखदुःखाभ्यांचेष्टाज्ञाननिराकृतिः तत्रानुभावाःकथिताःमहीनिपतनादयः
८ इतिश्रीः अत्रसरस्वतीच रजस्तमोभ्यामस्पृष्टंचित्तंसत्त्वमिहोच्यते निर्वृत्तयेऽस्यतद्योगात्संभवंतीतिसात्त्विकाइति अथवास
त्त्वेकोनपंचाशतेरेवभावानांतस्यैचित्तवृत्तिविशेषत्वेसत्त्वाहीनापुनःसमाहितचित्तैरेवनटैरभिनेयत्वात्सत्त्वोत्पन्नत्वेनसात्त्वि
कताव्यपदेशः तथाचभरते सत्त्वंचानुपतःस्थायिभावःसंचारिणस्तथा चित्तस्यपरिणामाःस्युःसात्त्विकास्तंभादयःपुनः
रिणामहेतोर्हाराकृतयस्तेऽभवत्परः देहस्यपरिणामास्तेसात्त्विकाइतिकीर्तिताः सत्यप्ययमविभक्तफलाःस्युरुभयेऽप्यमी
तथापिकर्तुंशक्यंतेनटैर्विदितमानसैः विक्षेपकत्वात्ते सर्वे स्वेदादयःपुनःसमाहितान्तःकरणैरेवाभिनयगोचराःतस्मा
त्सात्त्विकनिष्पन्नात्स्तंभाद्याःसात्त्विकामताः स्तंभस्वेदादिभिर्गम्याःकाश्चिच्चित्तवृत्तयः तास्तुस्तंभादयःशब्दोदितेल
क्षणावलात् तेनभावत्वमप्येषांस्वव्यवहृत्येवयुज्यते इति रत्नादेरतदर्शनादेतेषामनुभावतापि तथाचदर्पणे उद्बुद्धं कारणैः
स्वैःस्वैर्वहिर्भावंप्रकाशयन् लोकेयःकार्यरूपःसोऽनुभावःकाव्यनाट्ययोः उक्ताः स्त्रीणामलंकारा अंगजाश्च स

४०

५॰

णालोकृतः निद्रापास्त्वविभावत्वं दैवर्णामर्षयोर्मितम् असूयायां पुनस्तस्याः कश्चित्तैवानुभावता प्रकर्षस्य विभावत्वंस्मोहप्रलययोग्र
ति औत्सुक्यप्रलत्वमनुभावत्वमेवतेषाः परेषोपि च त्रासनिद्राश्रमालस्यामदस्तैर्थविवर्त्तिनाम् संचारिणामिदृक्कापिभवेद्व्यनुभावता सा
त्वाद्वतेनेसर्वथाष्टाङ्गिर्हासादिभिस्सह स्यात्परस्परयाक्तिंतलीलानुगणनाकृते वितर्कमतिनिर्वेदधृतीनां स्तुतिहर्षयोः बोध
मिर्दैन्यसुमीनां कश्चिद्दृतिविभावतेति श्रीः तथा चामरतेपि रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा जुगुप्सा विस्मयश्चेति नि
र्वेदग्लानिरेव च शंकासूयामदश्रमालस्यदैन्यमेव च चिन्तामोहस्मृतिधृतीव्रीडाचपलता तथा आवेगो हर्षजडते विषादो
गर्व एव च औत्सुक्यं च तथा निद्रापस्मार एव च सुप्तं विबोधो मर्षश्चाप्यवहित्थमथोग्रता मतिर्व्याधिस्तथोन्मादस्तथामर
णमेव च त्रासश्चैव वितर्कश्च अन्यमस्ते देतु ततः परम् रोमाञ्चः स्वरभङ्गश्च वैवर्ण्यं वेपथुस्तथा अश्रुप्रलय एव लक्षणान्यादहुरीदृ
श्चित्तवृत्तयः अन्तःकरणवृत्तीनां तासामेवानुभावतः बाह्याकाराणां चाशयान्यथा सोदयः तेषु स्थायिनः पूर्वे त्रय
स्त्रिंशत्ततः परे संचारिणः परे त्वष्टौ सात्त्विकाः संप्रकीर्तिताः इमि अपि चात्र नयति श्रीरिस्तु पलनाम् यद्धर्मम् इत्यादयोप्य
नियमाद्रसस्य व्यभिचारिणः तथाहि शृंगारे क्रियमाने तत्रावस्थितानामपि भावानां रतिरेव हासे पुनः पुनर्हास्यसमा नाव
भिचारीरसे चैवणएयंतमिति शृङ्गारव्यभिचारित्वं तत्प्रयोगात् तथा चैवभावितानामेव रसान्तरेषु संचारिता शृङ्गारवीरयोरुक्तो
वीरे क्रोधस्तथा मतः कृते तस्य लाक्षिका व्यभिचारिता न तथा पुनः रत्यादयस्तेनैव हर्षमातृतद्विभिः तदेवं स्थायिसंचारि
णो लक्षिताः भावा व्यक्तसात्त्विकलक्षणा यथा परिणामहेतोरागक्रमव्यत्यभवनात् देहस्य विकारमात्रे सात्त्विकाः परिकीर्ति
ताः चित्तसत्त्वीभवनात्तेन्यसेदानन्दस्य नकालिकिर्योगात्मलनिरोमभवनत्वम् तदात्मभावादयो भावाः सम्भवेदेव सत्व
त्यमी वक्ताविरुद्धादिघ्नतानि प्राणोतानवलेवतेन कराविनत्वप्रधानः कान्तेहेवरतिसर्वतः स्तम्भस्थितिस्थिताः प्राणाः तत्नोभ्य स्तुतं

का॰टी॰
८१

विषयाकान्ता विषयानुव्यक्तः शृङ्गारः २ येन प्रकारेण कान्ताविषया रतिर्विभावानुभावव्यभिचारिभिर्व्यक्ता शृङ्गाररसस्फुटः
तथा तेनैव प्रकारेण देवादिविषया रतिर्विभावादिभिर्व्यञ्जिता प्राधान्येनाभिव्यक्ता भावसंज्ञेयोक्ता एवं व्यभिचारिभावश्च प्रा
धान्येन भावादिभिरभिव्यक्तो भावसंज्ञ इत्यन्वयः रत्यादिषु हासादित्यादेरयमभिप्रायः प्रेयोवत्सलसख्येति येषिका
रसभेदा उक्ताः प्राचैस्ते भावसंज्ञयैव गतार्था इति यदित्ति तथा चैतेषां लक्षणानि ग्रन्थान्तरेषु अयमेव स्थायी स्याद्रतेः प्री
त्यादिरुच्यते मातानुकूलतोत्यत्रासमनन्तरमपरात्मिना कुलमकेषन्नग्राह्यमलिमूलेषन्नक्रमात् त्रिविधेषुत्र यो प्रीतिः
सख्येवत्सलतेत्यसौ तत्र प्रीतिः स्वस्माद्वेतित्येनूनात्तेनुग्राह्याद्रेतिमता आराध्यतात्मिका तेषां रतिः प्रीतिरितीरि
ता अस्यापत्यभक्तिसंज्ञा येन तुल्यानुकूलस्यातो सख्यायः स्तोमना: साम्यादिस्वमतप्रेषां रतिः सख्यमिति रूढ़ो २ य
स्वोपदेशस्मतेष्वप्यासतिविस्फुरिताः अनुग्रहमयी तेषां रतिर्वात्सल्यमच्यते इत्यादिरसामृते सिद्धान्तो रसौघः एतद्दे
वकुमेणीदशः हरति १ कण्ठकोणविनिविष्टमीश ते कालकूटमपि मे महामृतम् अप्युपात्तममृतं भवद्वपुर्भेदवृत्ति यदि
रोचते न मे २ अत्र भक्तस्य महादेवगोचरो रतिरीशानेनोद्दीपितास्तनिरूपेणाभावेन बहिः प्रकटीकृता ईशत्व
सहृदयालिभिः धृतिमाहात्म्यादिभिः सञ्चारिभिः पुष्टीकृता रसिकेषु भावसंज्ञया सहृदते मतिश्चात्र शान्तरसभावस्य
वप्राधान्येन निर्देशः तथा चोक्तम् सञ्चारिणः प्राधान्यानि देवादिविषया रतिः उद्बुद्धमात्रः स्थायी भाव इत्यभिधीयते
अस्यार्थः विभावानुभावव्यभिचारिभिः सम्यग्विभावरेषु प्राधान्येन रतिरेव तानवेपल्यचमत्कारिणी तत्र भावसंज्ञा तेषा
वेनदेवाभिप्रेत्योक्तम् सैव पारतन्त्र्येऽपि कुचिदेषास्तत्र भूपालस्यैव कस्यैव प्रवृत्तस्य करग्रहे इत्यादि पर्यालोचनये
वमेव व्यभिचारिप्राधान्येऽपि तेषम् २ मुनिविद्यागोदावरीति १ हरिनर्तस्य प्रपञ्चे लेरेष्वतः श्रमस्य पूर्वोचरिते कृतस्य ८१

भावनाः मसृणाः सात्त्विकाभावाश्च यावेष्टाः परास्त्वपि । एवं रसाष्टकस्य स्थायिनमभिधायाधुना विभावोल्लसितचिन्ताप्रशान्तात्मकं नवमं
रसं लक्षयति १ निर्वेदस्यामंगलप्रायस्य प्रथममनुपादेयत्वेऽप्युपादानं व्यभिचारित्वेऽपि स्थायिताभिधानार्थं तेन निर्वेदस्यापि
भावः शान्तोऽपि नवमोऽस्ति रसः १ निर्वेदस्य विषयवैराग्यात्मकत्वेन शृङ्गारादावमंगलत्वेनेति भावः यथा रत्यादेः स्थायिनो
ऽपि हासादौ व्यभिचारित्वं तथा व्यभिचारिणोऽपि निर्वेदस्य शान्ते स्थायित्वमिति तात्पर्यम् तथा चोक्तं स्थायी स्याद्विषयेष्वेव
तत्त्वज्ञानाद्भवेद्यदि इष्टानिष्टवियोगाप्तिकृतस्तु व्यभिचार्यसाविति तस्मात्सिद्धमेतत् तत्त्वज्ञानजो निर्वेदः शान्तो रसस्या
पीकारणान्तरजन्यस्तु रसः न तु व्यभिचारीति लक्षितश्च शान्तरसः निर्वेदस्थायितोपशमः शान्तोऽस्ति नवमो रसः विभावस्त
त्र संसारानित्यत्वादोषदर्शने विषयेषु रतिः तेषां चेषां समभावस्त्वरे भक्तिः पुराणपरेशाने गुरौ ज्ञानप्रदेशे वा नासाग्रदृष्टी
तत्त्वोपगमश्च निमीलनम् भस्मावगुण्ठनं नीराक्षायाचरणम् अनित्यतादिना शोकवल्ल निस्सारतया परमा
र्थस्वरूपं वा तस्यालंबनं विभावे मृगयाश्रमहरिक्षेत्रतीर्थरम्यवनादयः महापुरुषसंगमादयस्तस्योद्दीपनकारिणः रोमांचा
द्याश्चानुभावास्तथास्य व्यभिचारिणः निर्वेदहर्षस्मरणमतिभूतदयादयः २ एतदेवोदाहरति १ यथा अहौ वा हारे वा
कुसुमशयने वा दृषदि वा मणौ वा लोष्टे वा बलवति रिपौ वा सुहृदि वा तृणे वा स्त्रैणे वा मम समदृशो यान्ति दिवसाः क्वचित्पुण्ये
रण्ये शिव शिवेति प्रलपतः २ अत्र कस्यचिदुपशान्तस्य महापुरुषस्यानित्यत्वपरिभावितेन तदालम्बनो निर्वेदः पुण्या
रण्यादिभिरुद्दीपितः सर्परत्नादिसमत्वादिभिरनुभावितः शंकादिभावनिवृत्तिभिः धृतिमतिहर्षादिभिः संचारितः सहृदयेषु
शमरसतयास्वदते तथा च रसानां नवत्वमन्वनाधिकत्वं तथान्यत्प्रदर्शितमेवाग्रे प्रदर्श्यते २ एवमलंकृतक्रमप्र
संलक्ष्यविनाभावादौ लक्षयति ३ रतिर्देवादिविषया व्यभिचारी तथाञ्जितः भावः प्रोक्तः आदिशब्दान्मुनिगुरुनृपादि

का॰टी॰
७२

यंनिर्यंगादित्युक्तोतिमभिति २ एतेदेवक्रमेणोदाहरति ३ तत्ररसाभासोयथा स्तुमःकंवामाक्षिक्षणमपिविनायंनरमसेविलेभे
कःप्राणान्रणमखमुखेयंमृगयसे सुलग्नेकोजातःशशिमुखियमालिङ्गसिबलात्तपःश्रीःकस्यैषामदननगरिध्याय
सितुयम् अत्रानेककामुकविषयमभिलाषमस्याःस्तुमःइत्याद्यनुगतानेवहुव्यापारोपादानंव्यनक्ति १ नायिकायांबहुभु
एतानायकस्वंगारसमस्यानौचित्यादाभासत्वम् भावाभासोयथा राकासुधाकरमुखीतरलायताक्षीसास्मेरयौवनतर
ङ्गितविभ्रमास्या तत्किंकरोमिविदधेकथमत्रमैत्रींतत्स्वीकृतिव्यतिकरेकइवाभ्युपायः अत्रचिन्तानौचित्यप्रवृत्ता २ आदेशा
ज्ञःद्वियोगाःपश्चात्स्वस्वदिशितेष्वाचित्यम् अत्रचतनुरक्तायामपितस्यानायकस्यचिन्तनमनौचित्यम् २ एवमन्येष्वुदा
हार्याः २ अन्येहासाद्याभासाःशृङ्गाराद्याभासास्तु २ भावशान्त्यादीन्याद्याहिणावत्सरदीनामाह ३ भावस्यशान्तिरुदयःसन्धिःश
बलतातथा १ तत्राभस्तत्वक्रमेणैवास्यार्थः एषांबलतांसात्तुदाहरतिद्विवलसन्ते २ क्रमेणोदाहरणम् तस्याःसान्द्रविलेप
नस्तनतटप्रश्लेषमुद्राङ्कितंकिंवक्षश्चरणानतिव्यतिकरव्याजेनगोपायसे इत्युक्तेक्वतदित्युदीर्यसहसातत्संप्रमार्ष्टुंमया
साश्लिष्टारभसेनतत्सुखवशात्तन्व्याचतद्विस्मृतम् अत्रसुखविवशतानुभावेनकोपस्यप्रशमः नत्वत्रकोपस्यप्रशमेनप्र
सादस्योदयइतिप्रावल्यंशंकपनेनाथकोपस्यप्रशमएवपर्यवसानं नतुप्रसादोदयेनतदनुभावानामनुल्लेखात् एवमुदया
दिष्वपिज्ञेयम् २ एकस्मिन्शयनेविपक्षरमणीनामग्रहेमुग्धया सद्यःकोपपराङ्मुखंग्लपितयाचाटूनिकुर्वन्नपि आवेगा
दवधीरितःप्रियतमस्तूष्णींस्थितस्तत्क्षणंमाभूत्सुप्तइवेत्यमन्दवलितग्रीवंपुनर्वीक्षितः २ अत्रमन्दवलितग्रीवत्वानुभावे
नौत्सुक्यस्योदयोनतुकोपस्यप्रशमस्तदनुभावानुपादानात् २ उत्सिक्तस्यतपःपराक्रमनिधेरभ्यागमादेकतःसत्संगप्रि
यताचवीररभसोत्फालश्चमांकर्षतः वैदेहीपरिरम्भएषचमुहुश्चैतन्यमामीलयन्नानन्दीहरिचन्दनेन्दुशिशिरस्निग्धोरुणद्ध्य

७२

मैः शरीरमात्रांमवदीयदर्शनेव्यनक्तिकालशिलपेति यो यत्नात् अत्र वत्सोमेतिमत्सलंबनस्त्रारतिरच्युतरामाद्युद्दीपिता
स्मृतिरूपेणानुभावेन प्रकटीकृता मतिमात्रान्यादिभिः संचारिभिः पोषितो भावश्चमत्करोति अत्र मति
मालंबनमन्नारतिस्थायिभावो विभावादिसंयोगाद्रसीभूय वत्सलरसतां प्राप्नोति भरतसम्मत्वन्न तथा ग्रंथकृता प्राग्
प्रदर्शितोक्तं रतिप्रावः १ एवं रसे भावनता मदारस्य व्यभिचारित्वो पुष्टरसे इति १ मातेकोपपदाम्युलोविपुलमालमेयहृत्
मया मामासस्पर्शणात्तिनेति हृदलीनाते प्रवृत्ता ततः तो यावन्मातिरम्यचाटुकशतैनाथ्यामयामि प्रिया मातस्तावदद्द
शारेनविधिनातिशारदिष्ठीकृतः १ अत्र नायिकामालंबनमन्नारतिः कोपेनोद्दीपिता धृतिरंभेणचाटुकशतेन चानुभा
विता विधिप्रतिशठपदेशरूपयासन्धयासंचारितना चाभिलाषितेन सूतदाश्वासनेन स्थानपिशामाविप्रलंभरसतेनपरि
णतापि शानकरसमसीसारिटुरसोत्तुतिविधिप्रमस्तूयायाः केदनाज्ञानवस्ता एवमेवचरसश्रावणाः प्राधान्यप्रस्तावकृतो
भेदः तदुक्तं यथामरीचावगांदे कोमावेपिपाल्केटेकः कस्यचिन्नापिनथाभव्यभिचारिणोरसे २ एवंभावस्तस्यपिनतेषु
दाभासेलक्षयति १ तदाभासा अनौचित्यप्रवर्तिताः तदाभासा रसाभासाः भावाभासाः १ तयोरसमभावयोराभासा
इतिसमासः अनौचित्येनप्रवृत्तो रसो रसाभासः एवं भावाभासोपि बोध्यः नत्राचानन्नमनौचित्यमनु उपनायकसंस्थि
यां स्वनिष्ठरूपं लोगतायां चवकृतायां कान्निष्ठायां रतौ लग्नानुभयनिष्ठायाम् प्रतिनायकनिष्ठत्वे नहृदयमपात्रतिर्यगा
दिगतेश्रृंगारेनौचित्ये रौद्रेगुरुद्दीपितकोपेशान्तेलद्दीनविभावगतोत्तालंबनेहासे वधाद्युत्साहेधमपात्रगतेतथावी
रेउत्तमपात्रगतेभयानकेज्ञेयमितिरूपमनार्तल्यश्राभाषाः पुनरेतेषां वस्था वेतृणिना भवेत प्रातिकूल्यमनौचित्यम्
स्थानतेहितुयोवितत्म् विपत्तेश्रुतिरेतेषां प्रातिकूल्यमिनीयते अतत्तन्नमपाप्यनमनौचित्यादिंधामवेत् अप्राप्तौ निषधेता

देः तत्प्रशमादीनां तस्मात्तदुपकारकत्वाद्वाक्यार्थप्राधान्यमित्यर्थः । मत्सेरस्मेपितेगितं प्रामर्वंति कस्तावन्न नेभावप्रशान्त्यादयः श्रु
तिं तत्रानांतगतविवादप्रवृत्तमभवत् । अत्र तत्रैव भावप्रशमादेः प्राधान्यं पर्यवसानेन रसस्यैव पर्यवस्यति यथा वृत्त
स्वरत्यपराति वादिन्याभिरूपवरित्तैत एव प्रेक्षकाणां विस्मयकारिणि राजानां गते विवादप्रवृत्ते राजन्यस्ये ह चेष्टयंते ततो रा
सैव प्राधान्यं पर्यवस्यति राजा यमेवमनुगृह्णाति कः यत्रस्य मत्यमेव विधिना विवादयतीत्यर्थः । एवं विवक्षितान्यपरवाच्य
स्यालक्ष्यक्रमव्यंग्यतां प्रदर्श्य लक्ष्यक्रमव्यंग्यतां दर्शयन्नाह । अनुस्वानाभसंलक्ष्यक्रमव्यंग्यस्थितिस्तु यः शब्दार्थोभ
यशक्त्युत्थस्त्रिधा स कथितो ध्वनिः शब्दशक्तिमूलानुरणनरूपव्यंग्योऽर्थशक्तिमूलानुरणनरूपव्यंग्यः उभयशक्ति
मूलानुरणनरूपव्यंग्यश्चेति त्रिधा । घंटादीनामभिघातानन्तरोत्पन्नोऽनुस्वानः तत्सदृशोऽनुस्वानः तथा अनुस्वाने यथाक्रमः सं
लक्ष्यते अभिघातानन्तरं दृश्यपरः शब्द उत्पन्न इति तत्रैव संलक्ष्यः क्रमो व्यंग्यव्यंजकतात्पर्यविश्रान्तिदशायां प्रथमस्थितिः
र्यस्मिन्स ध्वनिस्त्रिधा कथित इति संबंधः यथानुस्वानानुस्वानयोः क्रमो लक्ष्यते तेन हृद्यलक्ष्यक्रमितद्युत्कानामित्यर्थः ।
एतदेव प्रपंचयति । तत्र अलंकारोऽथ वस्त्वेव शब्दाद्यत्रावभासते प्रधानत्वेन स ज्ञेयः शब्दशक्त्युद्भवो द्विधा वस्त्वेवेत्यनलं
कारं वस्तुमात्रम् । प्रधानत्वेनेति अप्राधान्ये तु गुणीभूतव्यंग्यत्वमित्यर्थः एतदेवोदाहरति । उल्लास्य कालकर
वालमहाम्बुवाहं देवेन येन जरठोर्जितगर्जितेन । निर्वापितः सकल एव रणे रिपूणां धाराजलैस्त्रिजगति ज्वलितः प्रतापः ।
अत्र शब्दशक्त्युत्थोऽलंकारध्वनिः कालो यथा हेतिमहतां चासौ करवालः खड्गः तस्य यो महानम्बुवाहः पाथितस्वत्तायदाह
दिकारिणो जीवापितलस्यवाहः प्रवाहस्तमुल्लास्योत्क्षेपैः प्रदर्श्य येन देवेन राजान्तरगर्जितेनाजितेन कठिनास्त्रिवलवन्नि
हन्ता हेन सकल एव रणे यत्र कामि सर्वेस्मिः संग्रामे त्रिजगति ज्वलितो रिपूणां प्रतापः धाराजलैः खड्गधाराकान्तिभिः निर्वा

43

ग्रामतः १ अत्र पूर्वार्धे ग्रामे गन्तव्यतायाः उत्तरार्धे हेतुः अत्र हेतोस्तस्य बलत्वेन संबलमात्मेषिः काकार्ये प्रागल्भ्यगुणः कवकु
लभ्यगोपि हृदयेन तस्माद्दोषाणां प्रशमायमेव कृतमहो पेकोपि को तं मालम् किं वत्सस्य कस्य षाः कृतपियः स्वमेपि साडले
भावेनः सात्त्वयद्विकः खलपुरावयनोधरेषामिति अत्र वितर्कोत्सुक्यमतिस्मृतिशंकादैन्यधृतिचिंतानां शवलताः
को कार्ये प्रागल्भ्यगुणः कवकुलमित्यभिलाषस्मृतिरूपा वितर्कावोधी वितर्क इति कथ्यते संदेहे हृदि विमर्शाख्यप्रत्यये हृदयताप
ते इति शान्तरसव्यभिचारी वितर्क इति भूयोपि हृदयेनेत्यत्र कालात्तमत्यमोत्सुक्यमित्यौत्सुक्येन शृंगारसंचारिणोपमर्ध्य
ते तदपि दोषाणां प्रशमायमेव कृतमिति नीतिमार्गानुसारादर्थनिर्धारणं मतिरिति शान्तसंचारिणा मतिभावेनोपमर्ध्यते
सा च अत्र कोपि कोतं मालमिति शृंगारसंचारिण्या स्मृत्या सोपमर्ध्यते तदपि किं वत्सस्य कस्य षाः कृतपियः इति शान्तसं
चारिणा शंकयोपमर्ध्यते सापि स्वमेपि साडलेभेति सामर्थ्याद्दैन्यायातनस्य भवदैन्यमक्षमतया इति दैन्येन शृंगारसंचारिणोप
मर्ध्यते तदपि चेतः सात्त्वयद्विकः इति तावता श्रीछायनमात्सेत्तस्य सह्रूपा स्पृहनाभूतिरिति शान्तसंचारिण्या धृत्योपमर्ध्यते सापि
कः खलपुरावयनोधरेषामस्तीति ध्यानचिंतादिना मानातेरिति शृंगारसंचारिण्या चिंतयोपमर्ध्यते तदेवं शान्तसंचारिणो वि
तर्कमतिशंकाधृतयः शृंगारसंचारिभिरौत्सुक्यस्मरणदैन्यचिन्ताः इति पूर्वं पूर्वे उपमर्दकत्वेनोत्तरोत्तरे आत्मभयाद्भावानामन्यो
न्यशवलतेति २ यथाभावस्य शान्त्यादयो वस्था लक्षयास्थितिरपाव स्थानत्वमित्याह ३ भावस्य स्थितिरुत्कोचोदाहृता च १
प्रशान्त्यादिभिरनवोद्यमानता भावस्य भावस्थितिः सा च तानेको पुष्परस्तावीत्यत्रोदाहृता वेत्यर्थः तथा शुद्धविभावा
दिभिधीयतितस्यास्तत्वात्पस्यमावृत्त्य प्रशमादिभिरवाधितत्वात् स्थितिरेवेति ३ ननु विभावानुभावव्यभिचारिसंयोगाद्रसनि
ष्पत्तिरिति सम्मटोक्तलक्षणेन रसेनतावाय मरुयसंचारिणो भावस्य भवनिरूपणं न प्रायोपानं चानकरत्वादिवोक्तदोषेन मरिता

कारी.
४४

गपदत्वेनैकोऽर्थः प्रकृतः सभंगपदत्वेन द्वितीयोऽर्थोऽप्रकृतः तत्रैकयोरसंबद्धार्थतावारणाय विरोधाभासालंकारस्त्वमत्का
रिकत्वेन शास्त्रशक्त्या व्यज्यते २ विशेषणाश्लिष्टेऽव्ययोरसामर्थ्ये नो विरोधाद्विरोधाभासो वा स्वप्रवर्तनं नायते इति केषांचित्कि
तर्ककावारणाय सभंगपदमेवोदाहरति ३ अमितः समितः प्राप्तैरुत्कर्षैर्हर्षद प्रभो अहितः सहितः साधुयशोभिरस
तामसि १ अमितः अविद्यमानामित्रमानं यस्मात्तस्य संबोधने अपरिमिता यस्य तथोक्तः एवंविधायाः समितः संग्रामात्प्राप्तैरुत्क
र्षैर्विजयोत्तिप्रायैर्हर्षद हे प्रभो साधुयशोभिः सहितो हितो हितमहितोऽसीति प्रकृतार्थस्य वर्णने अमितः अपरिमितः समि
तः परिमितः इति द्वितीयार्थे विरोधस्यासंबन्धः तद्वारणाय शास्त्रशक्त्या चमत्कारको विरोधाभासालंकारो व्यज्यते अपि
शब्दादेर्विरोधवाचकस्याभावादतो विरोधाभासस्य वाच्यत्वं न अन्योदाहरणं व्यज्यते इति परमार्थः २ निरुपादानसंभारमभित्ता
वेव कल्पते जगच्चित्रं नमस्तस्मै कलाश्लाघ्याय शूलिने अत्र प्रकृतस्य शिवस्याप्रकृतात् चित्रकराद्व्यतिरेकालंकारो व्यंग्यः २
न चात्रालंकारस्य व्यंग्यत्वे सति किमलंकार्यतोतालंकारत्वेनैवेत्याह १ अलंकार्यस्यापि ब्राह्मणश्रमणन्यायेनालंकार
ता १ यथा श्रमणीभूतोऽपि ब्राह्मणः प्राक्वर्त्तितया ब्राह्मण इत्येवोच्यते तथा व्यंग्यत्वेनालंकार्यतां प्राप्तोऽप्युपमादिरलं
लंकारोऽलंकारत्वेनैव व्यपदिश्यत इत्यर्थः २ प्राक् स्ववस्तुव्यंजकत्वमाह ३ यस्त्विग्राम्यस्य सम्यगस्तिमयामणिस्मेले गा
मे उन्नतपयोधरे पथिक नात्र वसतिर्नावसरस्य अत्र पयःउपभोगस्तमोऽसितदा वसतिर्व्यज्यते अत्र स्वयंदूतीवचनैः पान्थं प्र
गोप्यंप्रायं स्वाभिप्रायं प्रकाशयति पथिक नात्र संस्तरमस्ति मनाक्प्रस्तरस्थले ग्रामे उन्नमतः पयोधरान्त्यत्यदि वससि तदा
वसेति स्फुटः प्रकाशोऽर्थः गोप्यार्थस्तु पथिकत्वेदृ संस्तरशास्त्रमस्ति मनाक् प्रस्तरस्थले न तु बहुले ग्रामेऽतस्त्वं चिदपि
वासेन गते उन्नमतः प्रादुर्भवतः पयोधरान्मेघान्वीक्ष्य यदि वससि तदा वससि इति गोप्यार्थेन शास्त्रामावादेवाकारेण तत्रानादि ४७

पितो लोपित इत्यर्थः द्वितीयस्त्वलंकारः श्यामकान्ति त्वामसौ बालनलकमलश्यामसौ मदनेनैव ग्रस्ताद्धोमेव बलम्सत्ताम्स ऊर्ध्वमाकाशेऽप्र
काशप्रयेनेदेवेतमेघानां प्रवर्तकेन शाङ्गेणाकर्दितो निर्जितत्वनितेन सकलैकलकलमर्दितेनैव राजेशावे सति यावान्लैर्योरामा
रैः रिपूणामर्थान्सूर्यादितेनसंप्रतापः प्रकृष्टत्वापोनिर्वापितः शीतलीकृतः अत्र प्रस्तुतस्य राज्ञो वर्णने द्वितीयार्धसूचितस्य
प्राकरणिकसोद्रस्य वर्णनमसम्बद्धतया माप्रसज्येतेति सम्बन्धावगमाय प्राकृताप्रकृतयोरुपमानोपमेयभावः कल्प्यते ततश्चात्रोपमा
अंग्येत्यर्थः न चात्र श्लेष एव प्रधानं किमुपमाअंग्येति शङ्क्यं तथा द्वितीयेऽर्थे कृते तस्य प्रसवन्यायेन हानेवार्थो प्रकृतौ तत्र श्लेषः प्र
याते यत्र त्वेकः प्रकृतः परोऽप्रकृतस्तत्र प्राकृताप्राकृतिकम्लोऽलंकारध्वनिरिति व्यवस्था तथा चादिम एवालंकारः प्राकृताप्राकृत्याप्रका
शाते यस्मिन्नन्तकः श्लेषेन प्राकृताप्राकृत्यस्कन्धोदि सरत्ये स्विवृत्तमालोचनकृता यत्र प्राकृताप्राकृत्या मालादलंकारान्तरे वाच्यमत्य
निभासते स सर्वः श्लेषः यत्र तु प्राकृताप्राकृत्याः सामर्थ्यादिभिवाचाति रिक्तं वा श्लेषेऽलंकारान्तरं प्रकाशते स ध्वनेर्विषयः य
त्राभिधाया एकत्र नियमहेतुः प्रकरणादिर्विद्यते ततो द्वितीयाभिलषितोऽभिधानसंज्ञामतिना द्वितीयोऽर्थो लाबाद्भिन्नः इत्युक्ते
उदाहृतश्चालंकारध्वनिः अत्रान्तरे कुसुमसमययुगमुपसंहरन्नजृम्भत ग्रीष्माभिधानः फुल्लमल्लिकाधवलाट्टहासो महाकाल
इत्यादि न चात्र कालकरालपदमहाकुवाद इत्यालोचितोऽनिमित्तं किंसोपकल्पनयोऽभिवाच्यं तथाऽस्ति वाच्येनवस्यानुस्यमता
अपि च वर्णयेति रूपके वा कथित्रिकं सातनार्थीम् नभ्यसे नैवसान प्राकृताप्राकृतत्वं कुर्वालंकारध्वनिता तथा रूपमहेश्वरोपं विनाऽव
त्रमेव चन्द्रारोपेणानिश्चिताः स्मिताः सम्भोत्तरस्या विवक्षा स्यात् तथा च चक्रोपिसं शेनाप्रसंगः २ अत्र वाक्यस्यासंबद्धार्थाभिधायकत्वमा
प्रसक्तीति प्राकरणिकयो रूपमानोपमेयभावः कल्प्यः तत्र तनोपमालंकारो व्यङ्ग्यः तिग्मरुचिरप्रतापः विधुरनिशाकृ
द्विभोमधुरलीलः मतिमानतत्त्ववृत्तिः प्रतिपदपक्षाग्रणीर्विभाति भवान् विधुराणांवे विष्णाति शात्तयस्तत्कृत अत्रासम

जकतामाह ३ क्रमेणोदाहरणानि अलमसितेमणिदुतारकाग्निमोष्ठुति पद्मामसिद्विमत्तोदस्मिपद्मामणितेनवफुल्ल
विलोचनाणामस्मा अत्रसमसैवोपमोत्पद्यतेइतिवस्तुनावस्तुव्यज्यते १ अलमणिसेमणिःपूर्णनामग्निमः पुत्रिपन्नसमृद्धि
मयदृतिभणितेननतांगीप्रफुल्लविलोचनाजाता अत्रस्वतःसंभविनालोकेषुसिद्धेनप्रफुल्लविलोचनत्वरूपेणवस्तु
भूतेनार्थेनालंकारशून्येनसमसैवोपमोत्पद्यतेइतिवस्तुव्यज्यते तथाचालमसितेनाप्रवासितेपूर्णत्वनाविदृश्यते यत्नसमृद्ध
ग्रस्तुपिवनमितिवस्तुनार्थेनार्थोव्यज्यते २ स्वतःसंभविनोवस्तुनोलंकारव्यंजकतामाह ३ यस्याश्रियाकथयसि
प्रियसंगमेपि विस्रब्धचाटुकशतानिरतान्तरेषु नीवीप्रतिप्रणिहितेतुकरेप्रियेण सख्यःशपामियदिकिंचिदपि
स्मरामि अत्रत्वमधन्याहंधन्येतिव्यतिरेकः अत्रप्रणिहितइत्यादिकर्मणिक्तः तथाचनीवीप्रतिप्रणिहितेतुप्रियेण
करेअस्वेनतदर्पितइत्यर्थः हेसख्यइतिसखीनांमध्येसौभाग्यमानगर्वितायाएकस्याःसंबोधनेनधन्यासीत्येकच
चनेनबहूनामप्रतारितत्वप्रतिपादनाय सख्यइतिबहुवचनंतेननासंगतिः तथाशपामीतिमिथ्यानिरसनआग्रहार्थता
नशपथयथार्थतमतएवनात्मनेपदमितिविस्तरिका अत्रस्वतःसंभविनावाक्यार्थीभूतेनवैदग्ध्यतदाभावरूपेणवस्तु
नात्वमधन्याहंधन्येतिव्यतिरेकालंकारोव्यज्यते २ स्वतःसंभविनोलंकारस्यवस्तुव्यंजकतामाह ३ दर्पांधगंधगजकुं
भकपाटकोटिसंक्रांतनिम्नघनशोणितशोणशोचिः वीरैर्व्यलोकियुधिकोपकषायकांतिःकालीकटाक्षइवयस्यक
रेकृपाणः अत्रोपमालंकारेणसकलरिपुबलक्षयःक्षणात्करिष्यतेइतिवस्तु १ अत्रोपमालंकारस्यस्वतःसंभवि
तास्फुटैव २ स्वतःसंभविनोलंकारस्यालंकारव्यंजकतामाह ३ गाढकांतदशनक्षतव्यथासंकटादरिवधूजनस्य
यः ओष्ठविद्रुमदलान्यमोचयन्निर्दशन्युधिरुषानिजाधरम् अत्रविरोधालंकारेणोष्ठदशनसमकालमेवशत्रुवधो बोध्या

ष्ठितेस्मिन्ग्रामे एवं देवोद्दीपने मेघेस्मन्नमन्द्रलतानां कामिनीदृष्टा कौन्नादौ यमेमां संमोन्मत्रयातीति नवंकुरमिञायात्मकं वस्त
नेकार्थशब्दोपादानाकृम्यतेऽयमर्थः नवाङ्कोल्लासकालकरवालेति नद्यर्थस्य वाक्यद्वयस्य प्रकृताप्रकृतस्यास्य संबद्धस्य संबंधाव
गमायोपमालंकार एवात्रापि कल्प्य इति वाच्यम् अत्र द्वियोग्यगोपकभावेन द्वयोरर्थयोः संबद्धत्वमेवातः काव्योपमाकल्प
नावकाश इति २ शानिरपानि स्मृतमग्रे श्रेणि दृति कुर्वस्मिन् रेऽ पर्यमेतम् यस्य प्रसीदसि पुनः समभवत्सुदारोन्नतारस्य अत्र शि
रुद्धो द्वावपि तदनुवर्तनार्थमेकं कार्यं कुरुत इति योत्यते अत्र शानिरपानि विनि द्वावपि विरुद्धेन तदनुवर्तनार्थमेकं कार्यं द्र
नन क्रियं कुरुतः नद्योदारानुदारौ द्वावपि विरुद्धौ भवनक्रियामेकं कार्यं कुरुतः २ एवं शब्दशक्तिमूलध्वनिमभिधायार्थशक्त्यु
द्भवमाह ३ अर्थशक्त्युद्भवोऽप्यर्थो व्यंजकः संभवी स्वतः प्रौढोक्तिमैंकेवला त्सिद्धोवा कवेस्तेनोम्भितस्य वा वस्त्वालंकृति
र्वेतिषड्भेदोसौ व्यनक्तियम् वस्त्वलंकारमथवा तेनायं द्वादशात्मकः स्वतः संभवीनकेवलं भणितिमात्रनिष्पन्नो यावद्धहि
रप्यौचित्येनसंभाव्यमानः कविनाप्रति भाषामात्रेण बहिरसन्नपिनिर्मितः कविनिबद्धेन वक्त्रा वानेति द्वियोपवर्णितस्त्रिविधः व
स्त्वालंकारइति षोढा व्यंजकः तस्य च वस्त्वलंकारो वा व्यंग्य इति द्वादशभेदोऽर्थशक्त्युद्भवो ध्वनिः १ अर्थोपनवंजकः स्तो
र्थशक्त्युद्भवः स्वयं च कोर्थः स्वतः संभवी कवेः प्रौढोक्तिमात्रसिद्धो वा स्वतःसिद्धिर्हि संभवे केवलं कवे समकालान्तराग
तोर्वचनैः सिद्धः तेन कविनोम्भितस्य स्वगुम्फग्रथितस्य नायकस्य च समत्कारान्तगतो वचनैर्वाकेवलं सिद्ध इति त्रिविधः कवि
निबद्धस्य नायकस्योक्तिः कश्चित् कंदर्पैकस्य यातां तथोदीपिके नातनयोरनन्योन्यमेदः त्रेवि प्रोपिपुनः स्वतः सिद्धो व्यंजको र्थो
वस्तुरूपोलंकाररूपश्चेति द्विधा एवं कविप्रौढोक्तिसिद्धोपि वस्त्वलंकाररूपेण द्विधा कविनिबद्धनायकोक्तिसिद्धोपि वस्तु
लंकाररूपाभ्यां द्विधेति षड्भेदः सन्व्यंजको र्थोपि हस्त्वथ तत्व्या लंकारैवेति द्वादशभेदः २ स्वतः संभवितो वस्तुनायवस्तुव

संभवीयथाक्रममनुमेतां काव्यलिंगामपह्नुतिं च व्यनक्तीति अत्रैकस्यानायिकायानायककर्तृकं केशाकर्षणादर्शनेनान्यस्याः कामोद्रेकइतिसमासोक्तिरपीतिविचक्षिका २ कविप्रौढोक्तिसिद्धस्यालंकारस्य वस्तुव्यंजकतामाह १
गाढालिंगनरभसोद्यतमिदल्लकंसमोसरइमाणाः सितीभरणमणाणोपीलुउगामी अत्रोत्प्रेक्षयाप्रत्यालिंगनादिवतच्चभतेइतिवस्तु १ गाढालिंगनरभसोद्यतेदयिते लघुसमपसरातिमनस्विनीनांमानः पीडनभीतइवहृदयात् अत्रपीडनभीतइवेतिमानस्याचेतनस्यपीडनभयंकविप्रतिभोत्थापितंलघुसमसरतःसंभवीतिकविप्रौढोक्तिसिद्धयोत्प्रेक्षयाप्रत्यालिंगनप्रसादइसितादिवस्तुव्यज्यते २ कविप्रौढोक्तिसिद्धस्यालंकारस्यालंकारव्यंजकतामाह १ जाईवसंदसणीकइवअणाबुरुहबद्धविणिवेसादावेइभवणमंडलमणाव्विअजअइसावाणी अत्रोत्प्रेक्षयाचमत्कारैककारणंनवनवजगदन्तलंजासनस्यानिर्मिमीतइतिव्यतिरेकः १ यास्याविरमिवहसंतीकविवदनांबुरुहबद्धविनिवेशादर्शयतिभुवनमंडलमन्यदेवजयतिसावाणीतिकविप्रौढोक्तिसस्यजगदन्यतादर्शनस्यचलोकेष्वसंभवेपिकविप्रौढोक्तौवसिद्धत्वात्स्याविरमिवेत्युत्प्रेक्षयान्यदेवेतिव्यतिरेकोव्यज्यते २
अत्रापिपूर्वोक्तमनुसारयति ३ एषुकविप्रौढोक्तिमात्रनिष्पन्नः १ नतुस्वतःसंभवीत्यर्थः २ अथकविनिबद्धवक्तृप्रौढोक्तिसिद्धानांवस्त्वादीनांक्रमेणव्यंजकतामाह ३ एषुकविप्रौढोक्तिमात्रनिष्पन्नः १ नतुस्वतःसंभवीत्यर्थः २ अथकावियेलंकारागविमेदूलामवलिमासंभोअविणोरइ फाहन्फुल्लफणावलीकवलणेआपतादरिदजणाम नेदुद्धिमलआणिलाविरहिणीणीसाससंसग्गिलोजादाऊतिक्षिज्झणोविवडूलातारुण्णपुलाविअ अत्रतिःश्वासैःप्रासैश्वर्यैःकिंकिनकुर्वन्तइतिवस्तुनावस्तुव्यज्यते १ अत्रकर्पूरमंजरीकाव्येकर

46

पादिता इति तुल्ययोगिता समस्तनामस्वंस्तति निवर्तनाभिति तद्धुद्धिरूप्यसंयतस्त्वभेत्तावा १ अत्रोभयविषययोर्दर्शन
मोचनक्रिययोः स्फुटो विरोधाभासः स्ततः संभवी अथ रोनिर्दिष्टः प्रांत्रवो व्यापादिता अति तुल्यमेककाले योगो ययो
स्तो तुल्ययोगिता न योर्भावस्तुल्ययोगिता निमुत्यन्नाससत्र अपालंकारे वानक्ति नयाच दर्पणे अत्र स्ततः संभवि
ना विरोधालंकारेणापरो निर्दिष्टो दीपको व्यापादिता अति समत्र अपालंकारो व्यज्यते इति यत्तु तुल्ययोगिता व्यो
परो लंकारः स कष्टकल्पस्तदलम् २ अत्र पूर्वापरदिष्टस्ततः संभवितमनुस्मारयति ३ पते पूजादेरूणोष्ठस्ततः
संभवीजनकः १ पतेषु लसच्छिरोमणिविलासुरादरूणोष्ठ २ कविप्रौढोक्तिसिद्धस्ववस्तुनो वस्तुध्वनकत्वमाह ३
कैलासस्य प्रथमशिखरे वेणुसंमूर्छनाभिः श्रुत्वा कीर्तिं विबुधरमणीगीयमानां यदीयाम् स्रस्तापांगाः सरस
बिसिनीकाण्डसंजातशंकाः दिङ्मातंगाः श्रवणपुलिने हस्तमावर्तयन्ति अत्र वस्तुनायेषामप्यानिमानास्तितेषा
मप्येवमादिबुद्धिजननेन तत्कीर्तिश्चमत्कारं करोतीति ध्वन्यते १ अत्र वहिरसंभवतापि कविप्रौढोक्तिमात्रनिष्प
न्नेन मृणालवच्छशः कर्णप्रवेशानुपपत्तौ वस्तुनाचेतनता कीर्तेर्नामभिव्यक्तिः चमत्कारिणीति तल्लक्ष्यते २ क
विप्रौढोक्तिसिद्धस्ववस्तुनोलंकारव्यञ्जकत्वमाह ३ केसेषु बलामोटितश्चरोनासमरं निजप्राप्तिरीगदित्वा जद्रके
दरादि विहुतातः सदिहिं कंठअस्मि सैठविज्ञा १ अत्र के अग्रहालोकनो रितिममन्न याद्वकंदरा कुहरेषु रोकंदेशद्र
तीत्युक्ता एकजनः संग्रामे विजयदर्शनात्त स्यारयः पलायकुहराणि प्रविशन्ति कामदेहः नपलायनतावद्वि
लोपितततः परामावं संभाव्यतानकंदरानन्यतोतीत्ययहृतिश्च १ केशेषु बलात्कारेणाननजवयोः समवेदहृता
यथा कंदराभिर्विधुरा त्वस्यकंठे संश्लाघिताः विधुरारिपवः अत्रैनहाकाव्यः कविप्रौढोक्तिसिद्धएकनवादि लौके

का॰टी॰
४७

संलक्ष्यक्रमः १ येएवयेलोकोत्तरीत्याद्युदाहरणेषु २ तेनार्थद्वारकात्मकस्त्वेनतान्संदधाति १ एतेद्वारकाभेदाः १ दर्शितास्त्व
र्थः २ एवंशब्दशक्त्युद्भवमर्थशक्त्युद्भवंचसंलक्ष्यक्रमव्यङ्ग्यमुक्तोभयशक्त्युद्भवंदर्शयति १ शब्दार्थोभयभूरेकः १ उभ
यशक्त्युद्भवोध्वनिरेकप्रकारोलंकाररूपवस्त्वर्थः २ उदाहरति १ यथाअतन्द्रचन्द्राभरणासमुद्दीपितमन्मथा तारका
तरलाश्यामासानन्दंनकरोतिकम् अत्रश्लिष्टशब्दमाहात्म्यात्तुशब्दशक्तिमूलत्वंनहर्जितशब्दमाहात्म्यादर्थशक्ति
मूलत्वमित्युभयशक्तिमूलत्वम् २ यत्पदंपर्यायान्तरेणपरिवृत्यसहिष्णुनतच्छब्दप्रधानंयत्तुपरिवृत्तिसहंतदर्थप्रधान
मितिचइहसमुद्दीपितताराकाश्यामाशब्दाःपर्यायान्तरेणानुभयार्थैतानवभासात्परिवर्तनासहाःशब्दप्रधानाः अ
तन्द्रमन्मथतरलसानन्दशब्दास्तुपर्यायान्तरेणापिस्वार्थाभिधानक्षमत्वात्परिवर्तनसहाअर्थप्रधानाइत्येवमिदंवाक्य
मुभयशक्त्युद्भवंश्लेषमूलंप्रकृताप्रकृतयोःसर्वपदप्रतीतयेउपमालंकारध्वनिः श्यामानायिकाश्यामाशर्वरीव
कंनामसानन्दंकरोतीति २ सर्वमेवैतदुक्तासोकेध्वनिस्वरूपमनुस्मारयति १ भेदाअष्टादशास्यतत् १ अस्येतिध्वनेः २
अर्थान्तरसंक्रमितवाच्यादिप्रकारकस्यसर्वस्यैवध्वनेरेतेष्टादशभेदानतुसंलक्ष्यक्रमव्यङ्ग्यमात्रस्येतिभावः तथा
चार्थान्तरसंक्रमितवाच्योत्यन्ततिरस्कृतवाच्यइतिलक्षणामूलत्वेद्वौभेदौ अभिधामूलत्वेनलक्ष्यक्रमव्यङ्ग्यएकः
अभिधामूलत्वेनैवलक्ष्यव्यङ्ग्यक्रमतयाशब्दशक्तिमूलत्वेद्वौभेदौअर्थशक्तिमूलत्वेद्वादश उभयशक्तिमूलत्वेने
कइत्यष्टादशभेदाः २ ननुलक्ष्यक्रमव्यङ्ग्यस्यरसभावादित्वेनबहुभेदत्वमस्त्येवेतिकथमष्टादशभेदत्वमाशंक्याव
तारणिकापूर्वमाह १ ननुरसादीनांबहुभेदत्वेकथमष्टादशत्वमित्याह रसादीनामनन्तत्वाद्भेदएकोहिगण्यते अन
न्तत्वादिति तथाहिनवरसाः तत्रशृङ्गारस्यद्वौभेदौसंभोगोविप्रलम्भश्च संभोगस्यापिपरस्परावलोकनालिङ्गनपरि ४७

विनिबद्धायानायिकायाः प्रौढोक्तिसिद्धं नमलयानिलस्य सबलनदारिद्र्ययोर्वर्णनादिरूपेण वस्तुना वद्दिरसंभाव्येनध्या
मेऽर्थाः किं किं न कुर्वन्त्यनिवस्तु व्यज्यते २ नत्रैव वस्तुनालंकारस्य यथा सद्धि विरहदुःखमानः समसत्त्वीरनयोऽसा
समपि सदृशसत्त्वविरक्तलक्षणामिमदृशति नेत्राः सरिस्मम् अत्र वस्तुनाकृतेपि प्रार्थने प्रसन्ने ति विभावनाप्रिय
दर्शनसौभाग्यफलसोढुं न शक्यते इत्युक्त्वा १ सखितिसिद्धवर्णनमममधीरनेनाश्वासम् प्रियदर्शनविमुंखलं
दर्णोरुगिति तेनापरस्तंमम् इत्यत्र कविनिबद्धप्रौढोक्तिसिद्धेन वाक्यार्थीभूतेन येषां यमसदृशानुरूपेण वस्तुनावि
भावनोत्प्रेक्षाचालंकारो व्यज्यत इत्यन्वयः २ अलोलकदासणकपतेण्दिं तद्धलो चने समदृदिशां रतं सत्र्यपसादं
कोविमणपुरोणरमेणाक्रान्ता मिता अत्र किमिति लोचने कुपितेव कृष्णीन्मुनरालंकारेणनके वलंसिद्धेनावंत्तनानिरो
पपाशियावर्त्तेषामद् प्रसाद पाउनानेति वस्तु १ आग्रह करजदरणानन्दैनलोचनयोर्भ्रमदन्तरकाशुकप्रसादःको
पेन पुनः इमेनाक्रान्त इत्यत्र किमिति लोचने कुपितेवरलीति नायकप्रश्नमेकत्रैक वाक्यार्थीभूतान्तेदिनायाः प्रेति
वाक्यान् सिद्धेनोत्तरालंकारेणनकेवलं मिथ्यादिकं वस्तुव्यज्यत इत्यन्वयः ४ यथा च मनावद्धमृलं कारलयादि वेदिवे
चितमेव विवेचकैः अत्र वाक्यार्थ स्याप्रसंगे प्रविवेयान्य पुनः प्रश्नमात्रेषि पर्यायो नाम्नि शब्दालंकारस्यैव व्यंजकत्वेना
पद्भुत्यालन्त्रं वनिरीक्षितादिनादि २ मदिरलासरः समरिपक्वदृष्टिमयरसमदस्य सत्रमाऽश्रनी दिव्यन्तस्य प्रागणकस्मा
श्रृंगनगाकंपितणरुणरः अत्र देहलंकारेण नन्वोत्तनूकरणोपितवृद्वयेसानवत्तेनेरत्निविशेषाक्तिः १ अत्र तत्वद्
दयेस्यानाशामिल्लनो तनूकरणे देहं नादितिरेहलंकारेणकाव्यलिंगनामालमनोलनूकरणात्येत्समपिकारणोदृ
दिस्थानप्राप्यणात्मस्य कार्यस्यानन्यत्वाद्विशेषान्नालंकारो व्यज्यते २ एवं कविनिबद्धप्रौढोक्तिमात्रनिष्पन्नशरीरो

खलववहारा दीसंते दारुणाणव्य अवितह विधीराणं हिअअवअस्सबहुमआ ण दु ववसाआ विमुज्झंति अत्र मुज्झंतीति १ ख
लव्यवहारा दृश्यन्ते दारुणा यद्यपि तथापि धीराणां हृदयवयस्यबहुमता न खलु व्यवसाया विमुह्यन्तीत्यत्र हृदयमेव वय
स्यः सुहृत् तेन बहुमताः व्यवसाया न मुह्यन्तीत्यचेतनस्य व्यवसायस्य मोहप्राप्त्याचेतनधर्मयोगो नास्ति मुह्यन्तीति पदमत्यं
ततिरस्कृतवाच्यं व्यवसायप्रच्युतिलक्षणया विनामहापायेऽपि यत्नेन कृतं तत्त्वाभिमतकार्यकारित्वमिति २ एवं लक्षणामू
लध्वनिद्वयस्य कामिधामूलमलक्ष्यक्रमं पदप्रकाश्यं रसध्वनिमुदाहरति ३ लावण्यं तदसौ कान्तिस्तद्रूपं स वचः
क्रमः तदा सुधास्पदमभूदधुना तु ज्वरो महान् अत्र तदादिपदैरनुभवैकगोचरार्थाः प्रकाश्यन्ते १ अत्र विप्रलम्भरस
ध्वनेः प्रतीतौ विभावादिसामग्रीसत्त्वाच्चकाशं तदादिपदानामेवेतादृशस्वभावातिशयगोचरत्वात् व्यञ्जकत्वे प्रा
धान्यं परेषां तु तदा सुधास्पदमित्यादीनां वाक्यानां तदुपकारकत्वेनाप्राधान्यमिति पदमूलो ध्वनिर्व्यपदेश इति
एतदेवोक्तं ध्वनिकृता एकावयवसंस्थेन भूषणेनेति कारिकया २ एवं विप्रलम्भरसध्वनिं पदव्यंग्यमुक्त्वा संभोगरसध्व
निमाह ३ यथा मुग्धे मुग्धतयैव नेतुमखिलः कालः किमारभ्यते मानं धत्स्व धृतिं बधान ऋजुतां दूरे कुरु प्रेयसि
सख्यैवं प्रतिबोधिता प्रतिवचस्तामाह भीतानना नीचैः शंस हृदि स्थितो हि ननु मे प्राणेश्वरः श्रोष्यति अत्र भीतानने
ति पदेन नीचैः शंसन विधानस्य युक्तता गम्यते १ अत्र भीताननेति पदमात्रेण भयप्रतिपाद्यो कृत्रिमानुरागो व्यज्यत
इति प्राग्वत्पदव्यंग्यता २ रसध्वनेरनन्तरं भावादयः पदप्रकाश्या उदाहार्या इत्याह भावादीनां पदप्रकाश्यत्वे वैचित्र्या
नाधिक्यमिति न तदुदाह्रियते १ रसापेक्षया प्रकृष्टानामेव पदव्यंग्यत्वे रसव्यंग्यत्वे च यथाः २ शब्दशक्तिमूलमलं
कारं पदव्यंग्यमाह ३ रुधिरविसरप्रसाधितकरवालकरालरुचिरभुजपरिघः झटिति भ्रुकुटिविटङ्कितललाटप

तेवनादिकुसुमोच्चयनलकेलिमृणालसंपर्कचंद्रोदयकमलषट्कवर्णानादयो वहवो भेदाः विप्रलंभे स्याप्यभिलाषादयः ऽङ्गाः त
योरपि विभावानुभावव्यभिचारिवैचित्र्येन तत्रापि नायकयो रुत्तमाधममध्यमप्रकृतित्वेन तत्रापि देशकालावस्थाभेदादनेक
भेदत्वरसस्यानन्त्येकागणनानन्तभेदानाम् असंलक्ष्यक्रमव्यंग्यत्वसामान्यमाश्रित्य रसादिध्वनेरेक एव भेदो गण्यते १ साछेद्य
वृत्तिः २ वाक्ये शुभ्रः शुभ्र इति शब्दार्थोभयशक्तिमूलः १ द्वाभ्यां शब्दार्थाभ्यां नार्थेन चोतितः प्रादुर्भवतीति शुभ्रो शुभ्रो वा वाक्यमा
त्रे एव न पुनः पदे पीति भावः २ पदैकदेशे प्रतिपादितादीकोपकालवयवादिना भूषणेन कामिनीव पदद्योत्येन व्यंग्येन वाक्या
र्थगणापि भारती भासते १ अन्यपरेसस्वदशा प्रकाराश्च र्थान्तरसंक्रमितवाच्यादयः पदे वाक्ये चेति भावः अलक्ष्यकाव्यविशेषो
द्विध्वनिः तस्यातवाक्यगतत्वमेवसंभावितं न तु पदप्रकाश्यत्वमिति नापराकाद् एकावयवेति यद्यपि प्राधान्येन शरीरत्वेन का
व्यस्यार्काक्षात्तिमत्पदसमुदायस्यैव वाच्यत्वात् प्रतीतिरितिध्वनेर्वाक्यगतत्वमेव न्याय्यं तथापि किंचित्पदापत्तमेव चा
रुत्वमित्यर्थः विचारितेचैतत् विच्छित्तिशोभिनैकेन भूषणेनेव कामिनी पदद्योत्येन सुकवेर्ध्वनिना भाति भारतीति
ध्वनिकृता २ एतदेव दर्शयति ३ तत्रपदप्रकाश्यत्वे क्रमेणोदाहरणम् १ क्रमेणार्थान्तरसंक्रमितवाच्यादिनेत्यर्थः २
यस्य मित्राणि मित्राणि शत्रवः शत्रवस्तथा अनुकंप्योनुकंप्यश्च स जातः स च जीवति अत्र द्वितीयमित्रादिशब्दाः स्वा
श्वस्तत्वनियंत्रणात्स्नेहपात्रत्वादिसंक्रमितवाच्याः अत्र प्रथमानि मित्रादिपदानि द्वितीये मित्रादिपदैः पुनरुक्तता
दनुपयुज्यमानानि प्रयोजनपरत्वयाविश्वासितव्याकनीयत्वतेदायत्तत्वाश्रयणीयत्वनिरूपणत्वे निलक्षणामूले विश्वा
सातिशयादौ संक्रमितवाच्यानि तथा चात्र वाक्यार्थता प्रत्येकं विश्रामेन नैकवाक्यताश्रमगइत्वतो मित्रादि
पदानामेव व्यंजकत्वात् तत्र वाक्यमेवेति २ एवमर्थान्तरसंक्रमितवाच्यपदप्रकाश्यत्वमुक्त्वा तत्रात्यन्ततिरस्कृतवाच्यमाह ३

यष्टारद्योतेऽतिशयोक्ती २ अत्र वाक्यार्थीभूतेवल्लभः श्लिष्टं हाशिवाचक्रस्याशेषपदस्य वापदस्य च प्रभावादनेक
जन्मसहस्रभोग्यस्तकृतदुष्कृतदुष्कृतफलनाशोदुष्कृतफलतेनाश्रवमितस्यभवद्विरहदुःखस्य सुकृतफलनेनत
ध्यवसितस्यतच्छिन्ननाह्लादस्य च प्रत्यायनमिति शयोक्तिहृदीमलंकृतिंव्यनक्ति अतिशयोक्तिनेवाशेपमानेनय
कृतदुष्कृतफलेन निर्गीर्णस्योपमेयस्य भगवद्विरहदुःखस्य चिन्ताह्लादस्य च स्वस्याध्यवसानात् तथा चैतत्तत्त्वम
ति निर्गीर्णाध्यवसानं तत्प्रकृतस्य परेण यदिति २ अर्थशक्तिमूलस्तनः सभअलंकारव्यङ्ग्यमाह ३ तणादा
साक्षाद्दावनभवनेव्यसनमव्यसनम् वनवीरतवद्विषतां पराङ्मुखेवेनयिपराङ्मुखं सर्वम् अत्र शब्दशक्तिमू
लविरोधांगेनार्थान्तरन्यासेन विधिरपि तामनवनेन इति सर्वपदप्रोतं वक्तृ २ अत्र प्रथमार्धे शब्दशक्तिमूलो
विरोधो द्वितीयार्धस्य स्वार्थशक्तिमूलस्यार्थान्तरन्यासस्योपपादकः अर्थान्तरन्यासेन च सर्वपदस्य पारिहे तिसहृदाद
र्थशक्तिजत्वमिति २ अर्थशक्तिमूलालंकारव्यङ्ग्यमलंकारमाह ३ हृदवल्लभरसगोसमिस्त्रापिष्णुपयोसि
लाणकमलदलोइहणावबहुआसोऊणाकुणइवअणमहीसमुहम् अत्ररूपकेणनवाप्सवाङ्गुलिङ्गःपरिचुम्बनं कृ
तेयेनास्म्लानवमितिलाणपदयोमेकाव्यलिंगम् १ नववल्लभस्यागमसंग्रामीदयोम्लानकमलदलम् इ
ति नववधूः कलाकरोति वदनं महीसे नुत्वमिन्नत्र कमलदलमिति रूपकस्य वाच्यत्वादेव ततः सिद्धत्वम्लानत्वे
परिचुम्बनहेतुरिति काव्यलिंगम् २ पूर्वोक्तमनुस्मारयति ३ एषु लतः सभवीव्यंजकः १ सखुन २ अपुरक विशे
षोक्तिर्व्यंजकमाह ३ राईस्वर्वंदयवलाससलिलश्रिआस्फालिऊणजोचार्थ एकल्लन्तविस्तृकृणप्रबुवणावळवि
जिवेतो अत्रवल्लनायेषां कामिनाम् सो स्मरोराजात्तेभ्योनकश्चिदपितदादेशपराङ्मुख इति नाग्रद्धि कयभोगपरे

द्वौ विभासितरूपभीमः अत्र भीषणीयरूपं भीमसेनं उपमानम् अत्र भीमो भयंकर इति प्रकृतो वाच्योऽर्थः भीमसेनः पाण्डवः
स्य प्रकृतोऽर्थः तयोः संबन्धाभावात् मा भूदिति भयार्थशब्दशक्तिः प्रतिपादेनोपमा गम्यते भीमसेन इव भयंकर इति
अपि चात्र विभासीति मध्यमपुरुषान्यथानुपपत्त्या मन्त्रणं सिद्धं नृपकस्य पुंस्केवलेनेति परैरत्र न पदभीम इति नृपकं प्र
दुक्तं तदसत् २ शब्दशक्तिमूलं वस्तु पदद्योत्यमाह ३ अशक्तिमत्किञ्चिदेकान्तसमादेशान न तत्परः कल्पनानेदनिष्पादवि
धातिसदागमः काचित्सङ्केतदायिनमेवं व्याख्यायाकृत्या शास्ति २ समादेशीति योगाख्यानेन च ततः सन्निहितस्य
नायकस्यागमस्यागमनं सतत् श्रेष्ठं आसीत् आगमः शास्त्रे चेति सदागमशब्दः श्लिष्टः सतां गोप्यगोपकभावेन संबन्धेन
सन्निहितमपनायकं प्रति शास्त्रार्थमन्त्रणास्वरतार्थं वस्तु व्यनक्ति अवचयपानोपमाध्वनितस्तथोक्तप्राक् २ एवं श
ब्दशक्त्युद्भवं द्विविधं पदप्रकाश्यमुक्त्वार्थशक्त्युद्भवं दर्शयति पद्यमाह इति ३ सापत्नानपायितमलयजेनाग
समालेपितं यातोऽस्याचलमौलिमन्दमरुता निःश्वस्य मत्त्वानतः आश्चर्यं तव सौकुमार्यमभितः क्लान्तासि येनाधु
ना नेत्रद्वन्द्वममीलनव्यतिकरं शक्नोति ते नासितुम् अत्र वल्लनाकृतपरपुरुषपरिचयान्त्वान्नासीति वक्तव्यं प्रयु
नापदेन व्यज्यते १ अत्र स्तनः संभवितनावाकार्थीमत्तेन वल्लनापरपुरुषपरिचयान्त्वानासीति वस्तु व्यज्यते त
स्याधुनापद्याङ्कोनासितनयेवैयर्थ्यः क्रमः पूर्वं न तदरूपमभिदधत्पदसुनेति पदमेव व्यनक्ति २ स्तनः संभविनो
वस्तुनोऽलंकारध्वनिरुक्तनामाह ३ तदप्राप्तिमहादुःखविलीनाशेषपातकतच्चिन्ताविमलाह्लाददक्षीणपुण्य
चयात्तथा चिन्तयन्ती जगत्सूतिं परब्रह्मस्वरूपिणाम् निरुच्छ्वासतया मुक्तिं गतान्याऽगोपकन्यका अत्र जन्मस
हस्रैरुपभोक्तव्यानि कुकृतसुकृतफलानि वियोगदुःखचिन्ताह्लादाभ्यामनुभूतानीत्युक्तम् एवं चापाप्यच

काद°
५

स्वरत्नसंगरेणायति स्कंधोंसः सेनानिवेशाम्बु वलेसैन्यंसामसंधैव धम्मिल्लएवस्मरइतिरूपकं शेषं स्पष्टम् २ पूर्वोक्त
मलंसंदधाति ३ एषु कविशेषोक्तिमात्रनिष्पन्नशरीरः अनेकइतिशेषः २ कविनिबद्धवक्तृप्रौढोक्तिमिष्पन्नं
रूपकमेणाह ३ णवउणिमामिअअकस्सणसमअकोनंमअसिवणाहमरसं कामोहमसमप्पाणगेलनअणिवत
हअन्न अत्रवल्लनामधीवान्पामपिप्रथमेनवमनुरक्तउत्तनवेतिपशेमीत्यादिपदैर्मान्यवल्लभ्यते १ नवपूर्णि
मामृगांकस्सहमगकपवमसिमणमसत्यमकामोभागपसमग्गप्रदोषरजनीवनवाए अत्रनवपूर्णिमाचंद्रो
दिताविभविप्रदोषमात्रेराणवात्रनसर्वरात्रेनयानमपित्तणागीमामपन्यत्कायामभिसरसितस्यामपिनाग
रागीभूयान्यांगतासीतिवरएम् २ वल्लमूलालंकारोयथा ३ सहिणावणिउवणसमरंमि अकपालीपस
हीएनिविडएहारोणिवारिओचेअ उव्वरंतीनहोकइरमिअ अत्रवल्लनाहावक्केदानेनरमवप्पमन्यदेवरतमभूत
नक्कथयकीदृगितिव्यतिरेकः कथंपदगम्यः १ सखिनवनिधुवनसमरेअंकपालीसखीनिविडयाहारोनिवा
रितएवउद्धएवन ततःकथंरमितम् अंकपालीआलिंगनमेवसखी कथमितिपदंविस्मयेशेषंस्पष्टं २ अल
कारमूलवल्लाह ३ पविसंतीघरमारंविवलिअवअणायलोइऊणपइ लंदेजेतूणाघेउंहाहाणाहोत्तिरुअसिकि
त्तिअत्रदेनालंकारेणसंकेतनिकेतिनगच्छंतदृष्टायदितत्रगतमिच्छसितदपरंत्वदंगरुहीनागच्छेतिवस्तुकिंति
पदगम्यम् १ काचित्सखीसखींप्रत्याह प्रविशंतीगृहद्वारंविवलितवदनाविलोक्यपथानम् स्कंधेगृहीत्वा
घटंहाहाभग्नइतिरोदिषिसखिकिमितिअत्रस्कंधेगृहीतसद्घटस्यभंगेनदेवगृहप्रवेशसमयेविवलितमुखत्व
मितिहेतुलंकारेणसंकेतिभग्निनादिवाकागम्यवस्तुव्यज्यतइत्यनयः २ हूटसंशयात्रकारणंतरंलोपिसंभवा

५

रेचन्ते निःश्वासानि वासमुक्ते इति भ्रान्तये राज्यपदयोस्तेन वस्तु प्रकाश्यते २ अत्र कामस्य चापाभ्यासानन्दे तु केन भुवनराज्यका
रणानुरूपेणाबाध्यीभूतेन वस्तुना बहिरसंभवात्कविप्रौढोक्तिसिद्धेन येनाकामिनामित्यादिनाबाध्यीभूतेन व
स्तु प्रकाश्यते इति संबंधः तथा च तेभ्यो न कश्चिदित्यत्रापि तदिति गम्यमाना क्रिया नामपेक्ष्यापादाने पंचमी तथा चो
क्तं पाणिनीयैः गम्यमानापि क्रिया कारकविभक्तीनां निमित्तमिति तदयमर्थः तेभ्योऽपेतः पृथग्भूतः सन्न कश्चि
दपि तदादेशपराङ्मुखो भवेदिति २ वस्तुनालंकारो यथा ३ निशितशरधियार्पयत्यनंगो दृशि सुदृशः स्वबलं व
यस्य काले इति निपतति यत्र सा च तत्र व्यतिकरमेत्य समुन्मिषन्त्यवस्थाः अत्र वस्तुना युगपदवस्थाः परस्परविरु
द्धा अपि प्रभवन्तीति व्यतिकररूपो विरोधः अकाले सकलजनानां सकलाङ्गे यौवने इत्यर्थः कामेन स्वदृशोर्दृ
शि निजबलसमर्पणानुरूपेण वस्तुना बहिरसंभवात्कविप्रौढोक्तिसिद्धेन विरोधालंकारो व्यज्यत इत्यन्वयः ३ अ
लंकारेण वस्तु यथा ३ वारिजनेति पुरोगे दानवकदन्थि पणाहि अपण्णा पाणा मवनयन्स्तण्णा विस्तृता इ णवलि
सेहासे अत्र विमृहन्तातितलस्तुणे तेदृ तलकारेण हासेन वदनैकयमानपद्मालेन चलन्तीति पदयोजनवस्तु १ वा
पमाणोपि पुनः सताप कदर्थितेन हृदयेन तस्य तु भवद्व्यसेन ति मुहूर्तमात्रेण चलन्त्यस्याहावः अत्र विमृहाभिन
नाहिता अयान कदाचित्स्खलतीति नितलना भावेविमृहतिति हेतुः २ अलंकारेणालंकारो यथा ३ सो
मलयो पश्चिमो कलितनललिख्य शिरोदेहो मीद्रांतदाइवलोलसमसमेरोहरसमुत्तेनतेजसा अत्र रूपकेणावहु
तद्गुणकर्षणेन तथा केशपाशाः स्कंदेऽन्योन्यं प्राप्तः यथा तत्र न निरन्तावन्यानि कृतानि लाघः कामको भूरिति न वा
निपदयोत्था विभावना २ समस्त? पदकलनाशोपमिन्नः कलितनललितनिजरेहः नखाकेपाहलेनल्लासरः

तेन वृद्धविप्रो मृतहतौ पितौ वैरं पिकरावतः अभ्रंकनकवर्णाभं बालमप्राप्तयौवनम् गृध्रवाक्यात्कथं बालास्त्यक्ष्यथ म
विशङ्किताः इति निशि विजृम्भमाणस्य गोमायोर्नत्यावर्तनमिष्टं च वचनमिति इति प्रबन्ध एव प्रयते अन्ये तु का
दशप्रभेदा ग्रन्थविस्तरभयान्नोदाहृताः स्वयं तु लक्ष्ये दृष्टव्याः अपि शब्दात्पदवाक्ययोः अत्रापि वाक्यार्थः भावेतश्मा
नयं वाणप्रहर्षे पुष्टिं दुःखितास्ते किं विहाय हृदतः शोकविह्वलाः बालं मृतं गृहीत्वाथ श्मशानाभिमुखाः स्थिताः
तेषां रुदितशब्देन गृध्रोऽभ्येत्य वचोऽब्रवीत् इत्यादिके गृध्रगोमायुनाम्नीतिहासेऽस्मिन्ननेकवाक्यसमुद्दिष्टे प्रबन्धेऽर
ध्रवाक्यसमूहाभिधेयोऽर्थः स्वतः संभवी लोके पुनरद्भुतार्थप्रसिद्धानि शिष्टेतो गृध्रस्य राज्ञो संचारमावादिवैवसा
रूपादकं बालमृत्कालोकप्रवायनपरं वक्तुं नरं त्यक्तुमिति नैव गोमायुवाक्यसमूहाभिधेयो योऽर्थो गोमयोर्दिने साक्षि
कस्य राज्ञा वेवतिः शंकं स्वार्थसंपत्तौ छो बालमाद्यपलोकमावर्तनपरं वक्तुं नरं त्यक्तुमिति इति स्वयं वोमप्रसिद्ध प्रबन्ध एव
प्रयते एवकारामतेक्ष्यस्य कस्यचिन्नयद्वा पाक्यस्य वाक्यार्थावगमात्मकाशं तेइत्यर्थः नपुनरन्यपकाद्दशभेदा लक्षिता
स्वतः संभविनो वक्तृतौ वक्तृनरौ व्यञ्जकात्परे लंकारव्यञ्जकादयः तेनापि महादशात्मक इति लक्षणग्रंथाद्ववशिष्टाः स्व
पंलक्षेतु सुत व्याहत्यर्थः २ एवं पदवाक्ययोर्व्यञ्जकत्वमुक्त्वा पदैकदेशादेरपि दर्शयति १ एवं पदव्यक्यो व्यञ्जक
त्वमुक्त्वा पदैकदेशादेरपि दर्शयति पदैकदेशरचनावर्णेष्वपि रसादयः २ आदिशब्देन सर्वस्यैवालक्ष्यक्रमव्यङ्ग्यस्य
ग्रहणम् तथा च ध्वनिकृत् सुप्तिङ्वचनसंबन्धैस्तथा कारकशक्तिभिः कृत्तद्धितसमासैश्च द्योत्योऽलक्ष्यक्रमः क्वचित्
वशाद्वा निपातोपसर्गकालादिभिः प्रयुक्तैरिति इह हि अर्थावबोधकः प्रकृतिप्रत्ययसमुदायः समस्तिनानेकप
दसमुदायो वेति पदं द्विधा तस्यैकदेशः प्रकृत्यंशः प्रत्ययांशो वा समासे पूर्वपदांशोऽन्तरपदांशो वेति तत्रापि प्रकृ

51

कथं विवलितानननत्वमेव देवस्त्रियांशंकोद्धाद्दरणागनरमाद् १ विदलंल्लवलंल्लीनवस्रमदिदिहण्णाचउेणानंवलनादिहि
भावफलस्मिसेणाम्रप्पारहडेत्तिपाडिअविभिणो अत्र नदीकूले लतागहने कृतसंकेतमप्राप्तं गदृष्टप्रवेशावसेय
माहागतं दृष्ट्वा पुनर्नदीगमनाय हारवलनव्याजेन बुद्धिपूर्वं व्याकुलयन्त्या तदः स्फाटितइति मयाचेतितं नतत्किमिति ना
स्मिसिषितनस्मीदितसिद्धपेप्र जअहते स्वभूनिकदेस्वर्दसमधतिथिः ऐतिहासस्पर्शमिवेतोन्यपकुत्वावस्त्र २ विभ्रूवं
लोतामविरक्षाचटनेतरलनरहस्मि हारस्य शब्देषणान्मायकरितिपातयित्वाविभिन्नः शेषस्वरूपम् २ अलंकारम्
लोलकारो यथा १ नोहाइमङ्गस्मणाम्राविहस्मनाकणाऽस्नुम्रनेमणास्ताङ्गम्राधिणवोऽहतपवलहृअरहरहरदहिस्मम्र अ
त्रकाव्यलिंगेनास्मात्तृज्ञितानाहृद्धापरवपूर्मामिलवधीतिलदीपमावनिवेनकृतशक्यते इत्यालेपः परवपूपदप्रकाशः
योन्त्रयामपुरसेनचविमीलितनाहरणेन्दकमनाः सान्द्राप्तिनवोदेवपरपूरहृतवरइतिहृदयम् हृहायामनोहा
रितेप्योन्त्रामपुरसाभ्यादर्जनाहरणपदेनविविकाव्यलिंगशेषस्वरूपम् २ इलोकमनस्मारयति १ एवकविनिबद्ध
शोहोक्तिमात्रनिष्पन्नशरीरः अर्थकप्रकाशोनवृद्धेभेदोताहृतनम् शब्दार्थोभयशक्त्युत्थत्वपदप्रकाशोनभवतीति पञ्च
त्रिंशद्भेदाः १ अशब्दशक्तेभेदानांपदवाक्ययतत्वेहिविधेलेनद्वादशप्रोक्तमामेशब्दार्थोभयशक्त्युत्थस्यपदप्रकाशत्वा
भावादेकभेदत्वात्पञ्चत्रिंशदितिसिद्धम् २ एवंपदवाक्यगम्यशब्दार्थोभयशक्त्युत्थत्वंपवृत्तभेदप्रदर्श्य प्रसङ्गप्रतिप
त्तिनिर्णयायानेकवाक्यशब्दभिन्नरूपैकविषयेषु संकराणां... निर्दिशति १ प्रबन्धेप्यर्थशक्तिभूः
यथा गृध्रगोमायुसंवादादौ भारते १ न चात्र ... कश्चित्प्रा
लयमेष्यागतः इति दिवाप्रभवतो ... इति निद्रायां स्थितो ...

यथापूर्वोदाहृतौ नयतीत्युक्ते न शोभनम् इति तथा नैवं प्रकारेणास्मिन्पक्षे हारयतेः परिहृत्य पदानीत्युक्ते तेन हारेणाव
क्रमते ऽपसृत्य पदानीति प्रातिपदिकेनोक्तत्वाभावस्यातिप्रयोगोऽस्यते अत्रापि विभक्तेरप्रयोजकत्वात्सूक्तिनिर्दे
शतिका २ सकृन्नेयं जनकत्वाद्भक्त्या प्रत्ययमात्रस्य दर्शयति ३ तिङ्प्रयोगे यथा पचति पचतिपु स्रुकवचं चूषति रसं शाकं राज्ञा
दिशि दिशि पवमानो वीरुधां लासकश्च नरिनर्ति किरति द्राक्सायकान्पुष्पधन्वा पुरि पुरि च निवृत्ता मानिनीमा
नवृत्ती अत्र किरतीति किरणस्य साध्यमानत्वं निवृत्तेति निवर्तनस्य सिद्धत्वं तिजास्वयाच तत्रापि क्तप्रत्ययेन वातीत
त्वं द्योत्यते १ अत्रास्मिन्नुदाहरणे किरतीति तिङ्प्रत्ययेन साध्यमानत्वं पूर्वापरीभूतावयवतया क्रियायाः त्वं द्योत्यते
निवृत्तेति निवर्तनस्य सिद्धत्वमानञ्च चर्याया विशेषाधाने तु नयाविशेषणत्वं सप्रत्ययेन द्योत्यते इति संबंधः तत्रा
प्येवं तिङ्पो व्यंजकत्वेन सहपि क्तप्रत्ययेन कृता निवर्तनस्यातीतत्वं द्योतितम् यथा च साध्यत्वं क्रियात्वं सिद्धत्वं वि
शेषणत्वमिति पर्यायपृच्छया निरूपितं प्राक् वस्तुधर्मो हि साध्यसिद्धः साध्यश्चैतत्र अपि चात्र किरणस्य कारणत्वं
निवर्तनस्य च तत्कार्यत्वं वाच्यम् तथा चैतयोः क्रियायोः साध्यसिद्धत्वप्रतीत्या विपर्ययात्कार्यकारणयोर्वा पर्ययरू
पातिशयोक्तिर्गम्यस्य मानिनीवृत्ति शीघ्रत्वस्य हारावसेन कालक्षेपकत्वातिशयो व्यज्यते तदत्र तिङ्पोः रस व्यंजि
व्यंजकत्वे परमार्थानत्वसात्त्वादित्याशंक्य साक्षाद्व्यंजकतामाह ३ यथा वा लिखन्नास्ते भूमिं बहिरवनतः प्राणदयि
तो निराहाराः सख्यः सततरुदितोच्छूननयनाः परित्यक्तं सर्वं हसितपठितं पंजरशुकैस्तवावस्था चेयं विसृज कठि
ने मानमधुना अत्र न लिखतीति अपितु प्रमादपर्यन्तमास्ते इति तथास्ते इति न त्वासितमिति भूमिमिति न तु भूमा
विति नहि बुद्धिपूर्वकपर्यं किंचिल्लिखतीति तिङ्सुब्विभक्तीनां व्यंग्यम् २ अत्र लिखन्नित्युक्तेन न तु लिखतीत्यतः प्रा

तिद्विधा धातुप्रातिपदिकं धातवी प्रातिपदिकं नाम सर्वनाम निपातभेदेन त्रिधा निपातो पुनर्द्विविधः धातुप्रकृतिरपिस
पसर्गश्चेति द्विधा प्रत्ययोपि द्विस्तद्धित तिङ्कृद्भेदेन चतुर्धेति २ ते चापदेकदेशानां व्यञ्जकत्वक्रमेणोदाह्रियन्ते
धातुप्रकृतेः शम्भोरादरिति १ तत्र प्रकृत्या यथा रसोध्वन्यत इति शेषः २ रसकेलिदिक्षु
रुद्धणत्रप्राणत्रयलस्य हृदयान्तः प्राणप्राणं पर्यवतिष्ठति सङ्केतेन प्रत्ययमती तिन शोभते इत्यादि समाने पिरि
स्पगत व्यापारे लोकोत्तरे रोगो वा स्यादिधानमिति तदेवोत्कृष्टम् २ रतिकेलिहृतनिवसनकरकिसलयरुद्धनयन
पुगलस्य रुद्धस्य नेतीयतन यतं पार्वत्यापरि चुम्बितं जयति रतिकेलिहृतनिवसनव्यासेनात्र नयन करकिसलयाभ्यां
रुद्धं नयन पुगलं यस्येता दृशः चेति समासः अत्रा स्पगता याता नयतीत्युक्ते शोभते इत्यादि लोकमित्यन्वयः तथा
चोक्तेत्रजयतीति सिन येर इति धातुप्रकृतिमात्रे णापदैकदेशेन पुगादरसोध्वन्यते तथाहि यद्यपि जीस्थवनयना
निपिहितानि तथापि हृदयस्य लोकसिद्धं हृत्ता भ्यास्यासनेकृतन्तीयस्यतलोकोत्तरेणालोकिकेन तुं बनेनेत्यत
एव जयतिनयन पुगादमस्मादुत्कर्षमावर्तते अत्कर्षश्चारागादि शयदर्पलज्जासंशादनद्वारेणाद्रसातिशयपो
षणात् तदेव संभोगशृङ्गारस्य रसत्वं तत्वमिति अपि चात्र जयतीतिस्तत्पि प्रकृतिप्रत्ययसमुदाये अत्कर्षप्राप्तज
दायापेक्षीत्यत एव पदैकदेशत्वं २ एवं धातुप्रकृतेरौजकत्वमुक्त्वा प्रातिपदिकप्रकृतेरप्याह १ तथाच शेषान्ता
यमपाकृतः स्पशापशादानतः कान्तद्वाहि आशो नवपदातिवासभवतापान्तवाम्नानाः तावद्वयतनपाणि
प्रटलसन्नीवीनिबन्धं शनोपाविनै वक्ष्यप्रणामकसहोप्रमाणो विनिशामतेः अनपदानीति तन्त्रहास्यापि १

कादं.
५३

तः प्रमत्तस्थिर प्रेमार्णवद्रुमानमेतान्यनामालोक्य किं न त्यजसि किं मम मे विहरिष्यसे वनहतां मुंचोनरागामि मा सेषा
केदनटैकृता खलु शिला संमारवारीति यो अत्र प्रहासः १ प्रहासे मन्योपपदे मन्यते रुत्तम एकवच्चेति पाणिनिसू
त्रात् निर्दिष्टः निष्पन्नस्य पदस्य एष्यामोत्तमपुरुषयोर्विनिमयः प्रहासं द्योतयति प्रहासमस्य गृणातिरसान्तिशायं ज्ञापयति २ प
दपदैकदेशस्यतिरोहितिर्यन्तस्य पदस्य व्यंजकतामुक्त्वा समभिसितपदैकदेशस्यापि द्योतयति ३ पूर्वनिपातस्य यथा येषां
दोर्बलमेव दौर्बलतया ते सम्मतास्तैरपि प्रायः केवलनीतिरीतिनिपुणैः कार्यं किमन्तर्वीरैः ये त्वा शाक्रपुनः प
राक्रमनयस्वीकारकौ तक्रमास्ते सुर्मूपभवादृशस्थितिगतिहिंस्राः पविज्ञाः पदम् अत्र पराक्रमस्य प्राधान्यं गम्यते १ अ
त्राभ्यर्हितं चेति सूत्रेण निकाचोऽपि पराक्रमशब्दस्य द्वन्द्वसमासे पूर्वनिपातः प्राधान्यं द्योतयद्वीररसं पुष्णाति २ एवं स
मसितपदैकदेशस्य दाहृत्य ध्वनिकारोक्तस्य कारकसंबंधस्य स्वरस्तु नरपि सुप्रत्ययस्य व्यंजकतामुदाहरति ३ विभ
क्तिविशेषस्य यथा मधनाध्वति धीरधवर्धति भ्रति विधुरैर्योयापितवद्दिवसम् दिवसेन तु नपरमवानपुरुषविधि
सिद्धसाधुवादपदम् अत्र दिवसेनेत्यपवर्गे तृतीया फलप्राप्तिं द्योतयति १ अत्र भवविधुरैरतिभिर्दिवसमयोधित
वनयः प्राग इति भवांस्तु दिवसेनापुरुषनयप्रामवानित्यथ विशेषमपवर्गे तृतीयेऽसन्नप्रासतां हितीयान्तीयास्तु
द्विभक्तीद्योतयन्तौ वीररालंबनस्योत्कर्षं पुष्णीतः २ तद्धितप्रत्ययस्य व्यंजकतामाह ३ भूयो भूयः सविवत
गरीरथ्यायाप्र्यटते दृष्ट्वा दृश भवनवलभीतुंगवातायनस्था साक्षात्कामनवमिव रतिर्मालती माधवं यद्गाढोत्कंठा
ललितललितैरंगकैस्ताम्यतीति अत्राङ्गकपारन्तेः कप्रत्ययस्य २ अत्राङ्गकपापेत्तद्धितप्रत्ययः कप् मालत्य
ङ्गानामङ्गकं पत्न्वहारसौकुमार्यं तेनवद्दुःखोसहिष्णुतां प्रकाशयद्विप्रलंभं पुष्णाति २ परिकेदातीलः सकलवचना

63

५३

तेन गणाः क्रियया मत्वा क्रियापेक्षितत्वेन शाधान्याल्लिखन स्मात् बुद्धिपूर्वकत्वं ध्वनितं आले इत्युक्तेनासीदिति जवतेमान
कालस्य शारदापरिसमाप्तिलक्षणानयानितानवस्थानस्य प्रसादस्य तनायोतिता एवं भूमित्युक्तेन तद्भूमावित‍ि
ततस्य न किंचिद्बुद्धिपूर्वं कलितवतीति स पायोतितम् भूमावित्यधिकस्याभिधाने लिखितवती यस्य कर्मणाक्रान्तिस्तेन
नबुद्धिपूर्वकता स्यात् चतन्योत्स्वप्नः लिखतीत्यत्र स्वपितिस्वधेनतेप्रान्तिजादेशानाजिइ तेनेवमपदेशः २ ग्रामरुहः
स्मिन्ग्राम एव स्वामिनगर्थ्यिति नृनाणाभिणा अरिग्रामणीपती दृशामिजाहोमिशाहोमि अत्र नागरिकाणामितिषष्ठ्याः २
ग्रामाहीस्मिग्रामेव स्वामिनगर्थ्यितिनजानामिना नागरिकाणां पत्नी नृहशामियाभवामिवाम्भि नगरस्थितिवेदग्धीमि
मर्थः अत्र षष्ठी वा नादरे इत्यनुशासनाननागरिकाणामनादरमित्युक्ताः एवं च स्त्रीवनादरस्य तत्पत्नी नृदृशामीत्यनादरवाचिनी
षष्ठी ताटस्थ्यलाभिमतेनैनतायिकायावज्ञाभिव्यज्यते शायनायोनयत्नी श्रुमारध्वनिपोषयति २ रमणीयः त्वत्रियक्रू
मारस्थासीदितिकालस्य पूर्वादिभगवतोद्भुतत्वकार्यैकदाप्रावर्थिं अतिभागेव सोक्तिः १ अत्रासीदित्यतीतकालवाच
कत्विग्रन्ययोमकोधकवलितस्याख्यानंस्थितैस्तैर्मानुत्वनवाभविष्यतीतिप्रकाशं स्यन्मार्गवक्रो भाति शार्दूलनिकि २
वचनस्य यथा नगरांगणाग्नदृणांणानागरकृत्तप्रातस्थयेमः सतां कामिनीनां ग्रामांतरं दरदुःखितमजाग्रेश्रवसाशां अत्रगण
ग्रहणादीनां बहुत्वप्रेमाणाश्रेकत्वप्रोत्नम् १ तेषां वरुणाग्रहणान्नानासाध्वकृतानानात्मसाथेम्याः तेषामभिनतानां सुदूरे
ग्रामवृत्तान्तम् अत्र गणाग्रहणादिशुत्तप्रान्तयबहुवचनेनानाप्रकारकजनसामर्थ्येनप्यामावंयोनयनिप्रेमाणानेक
वचनमेकरूपत्तया कदाचिद्दृष्टिनान्याभावं प्रकाशयतीतिरम्यान्यास्था तिनोनिर्गावेनमानाख्यविप्रलंभमङ्गार-
स्य पुष्टिः २ एवं सत्युत्तमास्यपोतकनामुक्तानिप्रतमस्यादृ ३ पुरुषस्यतनयस्य यथा २ एवं चललोचनाचितत्वचे

का.टी.
५४

मदनधनुर्भ्रुवोः पदन्यग्रेऽपि वसति सकलललनामौलिमियं चकितहरिणनयना अत्रेमतिनव्ययीभावककर्मम्
तापारागांस्तद्रूपस्य तरुणानेऽरितिधनुषः समीपे इति मौलौ वसती त्यादिभिस्तत्सेनेणावाचकनेतिकस्मिंस्तद्रू
पस्य विशेषोयस्य मत्कारकारी स एव व्यञ्जकत्वम् २ तरुणीमतितारुण्येकलां वृद्धिं कलयति सति तस्या भ्रुवो
रग्रे भ्रूप्रान्ते अत्र मदनधनुः स्मरचापस्य वशगो समीपे इति शिष्टी भूयतस्य वक्रतामोहननादिकमभ्यस्त
वजिमति इयं चकितहरिणनयना सकलललनामौलिमपि सर्वललनामौलिभूवसतीत्यन्वयः अत्रहीमति
जातछितप्रत्ययेन सुकुमारात्तरेणताहशमेवनवोद्भिन्नवयः प्रतीयते तरुणान्येतात्तरुण्ये इति तु प्रौढात्तरेणाप्य
यातरेणावेत्याहुः स्यात् तर्हि वयसोऽपि प्रौढत्वे प्रतीयेत तत्तु न विवक्षितम् अत्र मदनधनुरिति पूर्वपदार्थप्रधानो
व्ययीभाव इत्यनुशासनात्समासेनोत्तरपदस्य मदनधनुषो प्राधान्येऽसिद्धे भ्रूलतायास्तत एवात्तेपसिद्धत्वाद
शीकरणसामर्थ्यं प्रतीयते मदनधनुषः समीपे इति चेत्साहः स्यात् दहितयान प्रतीयते तथा मौलिमपीति पाठेस
कलत्वाभिलषणे सौलावितिपाठे एकदेशवृत्तित्वेनेति तद्रूपेणात्तरसौकुमार्यादिनैवायं विशेषः तत्तदर्थद्योतक
त्वेन तत्पर्यान्तरत्वेनेत्यर्थः २ रसादयइत्यादिशाब्दसंग्रहार्थं दर्शयन्नाह ३ एवमुक्तेषामपि बोद्धव्यम् १ यथापदैकदे
शोरसध्वनिव्यंजकउक्तस्तथैवान्येषां भावादीनामप्यलक्ष्यक्रमव्यङ्ग्यध्वनीनां व्यञ्जकोऽलत्वाद्बोद्धव्यम् इत्यर्थः २ व
र्णरचनानां व्यंजकत्वेगुणस्वरूपनिरूपणोदाहरिष्यते १ गुणस्वरूपणोष्टमोल्लासे २ वर्णाश्चेपि रसादयइति
कारिकान्तर्गतस्यापिशब्दस्यार्थमाह ३ अपिशब्दात्प्रबन्धेषु नाटकादिषु १ नाटकादयः प्रबन्धास्त्रपि कृत्याशरीरस्य
विवक्षितरसभावाद्यपरपर्यायउद्दिष्टाविभावादितोऽविनिबन्धनेन रसादीनां व्यञ्जयन्तीत्यर्थः निर्णीतमेतदालोच ५४

54

नामविषयः पुनर्जन्मन्यस्मिन्नन्यस्य पर्यायेणेगतवान् विवेकप्रध्वंसादुपचितमहामोहग्रहनोविकारः कोप्यनन्तज
यतिचनाएवकुरुते अत्रप्रशाद्यस्योपसर्गस्य १ अत्रप्रशाद्यस्योपसर्गत्वाद्युक्तपदप्राप्तिभूतस्य प्रकर्षद्योतकत्वावि
वेकसमूलोन्मूलनं वेगयते नचनेऽज्ञतादिव्यभिचारादिणो बाणस्येन विप्रलंभनातिशयः २ कृतेचगर्वाभिख्यलमनः
स्त्वयाकिमन्यदेवनिद्रुतास्थनोदयः नमोस्मितिष्ठतिदितावदशुभान्नाशनदायात्मदयादिमोलिताम् अत्रतल्ययोगि
तायोतकस्यचेतिनिपातस्य १ अत्रतल्ययोगितापदंतत्त्वमयवाचकं तथादिमनसोगर्वाभिख्यलोकरणमात्रस्य
शत्रुहननस्यतल्यकालतनाचकारद्वयवर्णनात यात्वदीरसप्रकृतिः अत्रचेतिनिपातस्यमातिपरिकमात्रस्येवमन
कर्तनप्रत्ययस्येतिपदैकदेशता २ रामोसौभुवनेषुविक्रमगुणैः प्राप्तः प्रसिद्धिपरामस्मद्भाग्यविपर्ययाद्यदिप
रंदेवोनजानातितम् वंदीवैषपयोभिगायतिमहत्प्रभोकवाराणदितिघ्नेणीभूतविशालतालवदनोग्रीर्गौः स्तवैः
सम्प्रभिः अत्रासाविति भुवनेष्विति अस्मादिति इत्युक्तिति पुर्वनामवचनप्रातिपदिकवचनानाम् नतरितिनम
दिति अपितस्मादित्यस्यसर्वापेक्षित्वमात्रविषयंयादित्यस्यासंपतिकालेननतभागस्यवेनाभिधानस्य १
यदिपरमितिसमस्तंपदमवधारणार्थनिपातः असाविति अस्यपदेन सर्वत्रान्वः प्रकृतिमात्रेण विभक्तिम
नपेक्ष्यैवरामस्यमहिमातिशयात्मकत्वस्यायमाभासेनउच्यते नस्वेन भुवनेष्विति बहुवचनप्रत्ययमात्रेण सर्वत्रैवन
तस्थाप्येकदेशइत्युच्यते गुणैरिति बहुवचनेनदोषाभावमात्रभावः अस्मादिति बहुवचनेनलकेवलतवममवा
किंतु सर्वस्यकुलस्येति भाग्यविपर्ययादितिपदेनाभाग्यमात्रमयेयवाचकं तथाभाग्याभावनैवाभाग्यत्वेनपत्रमभाग्य
त्वेनपरिज्ञातानि तन्नस्माकंकदाचिदिति भाग्यानाममभावोभूदितिव्यज्यते २ नकोऽपिमतिकलयतिकलामन्त्र

तयः किमयं लोमलतालोचनान्तरे संक्रमितः किमनुरागानन्धायैनोपभोग एव संपन्नक इति संदेहः १ तत्र मसृणिका
देवर एषा ते जायया किमपि भणिता नो वेति पलोहरवल्लभी यद्धेऽस्तनीयतां वराकी तत्रणः उत्सवः तत्र प्रागुणि
कानि भयानीता पलोहरे सूने इत्यालोचने पलोहरे रहूयस्माद्वागाइति विस्तरिका कस्याश्चिद्देवरचौरकामिन्याः
काचित्त्वदेवरानुरक्ता विदितरहस्ता तया तज्जायया कोशिनाम्नपलभ्यत्वयमेवोऽस्माद्देवरं प्रतिलोपालभेयमुक्तिः
तत्रानुनीयतामिति वाच्यमनुपपद्यमानतेन विवक्षितमतु एकान्ते चिते तत्संभोगेन परितोष्यतामेवेत्यर्थान्तरेसं
क्रमितं किम किं वा ले तावदस्या मे वानुरागी तीर्ष्यायामेव नाम्न्यर्थान् एषा तमेदानीमवगर्हणीया प्रेमास्पदतयेवा
त्वनेनेत्यत्वेनानयो विवक्षितः सत्सूपस्य एव वयमिदानीं गर्हणीयाः सपत्न्याः त्वमपरत्वेन भासते इत्युभयथापि
स्वाभिप्रायप्रकाशनतात्पर्यादेकतरानिश्चयेनाविवक्षितवाच्यविवक्षितान्यपरवाच्ययोः साधकबाधकप्रमाणा
भावात्संदेहसंकरः २ स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घना वाताः शीकरिणः पयोदसुहृदामान
न्दकेकाः कलाः कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे वैदेही तु कथं भविष्यति हहा हा देवि धीरा भव अत्र लि
प्तेति पयोदसुहृदामिति चार्थान्तरसंक्रमितवाच्यात्यन्ततिरस्कृतवाच्ययोः संसृष्टिः तावुभौ तद्रामोऽस्मीत्यर्थान्तरसं
क्रमितवाच्यस्यानुग्राह्यानुग्राहकभावेन रामपदलक्षणैकव्यञ्जकानुप्रवेशेन चार्थान्तरसंक्रमितवाच्यरसध्वन्योः
संकरः १ अत्रापूर्वमेवोस्मि लिप्तमितीत्यसंभवदर्थान्तरे व्यापने संक्रमितम् पयोदसुहृदामिति सुहृत्त्वं चेतनाहीने
मेघेऽसंबद्धतादृत्येन तिरस्कृतवाच्यमतु परितोषकत्वं लक्षयति व्यापनपोषणातिशयौ व्यङ्ग्यौ पा अत्रार्थान्तरसं
क्रमितात्यन्ततिरस्कृतवाच्ययोरेकपदमेवाभेदेन ज्ञायमानयोस्तिलतण्डुलवत्संसृष्टिः पूर्वं त्वंत्वनुवादकत्वेन भेदानव

55

ने प्रबंधस्य रसादीनां व्यंजकत्वं निबंधनमिति ध्वनिकारिकायाम् नाटकादीत्यादिशब्दग्राह्यप्रकरणादीनामवान्तरविग्रहः
तथाहि मालतीमाधवप्रकरणं शृंगारव्यंजकं रत्नावलीनाटिका च शृंगारव्यंजिका २ पूर्वोक्तमन्यत्सर्वमपि २ एवं रसादीनां
पूर्वगणितभेदाभ्यां सह षड्भेदाः १ पूर्वगणिताभ्यां पूर्वोक्ताभ्यां पदवाक्यगाभ्यां पदवाक्यपदैकदेशवर्णरचनाप्रबं
धव्यंग्यत्वेन षड्भेदो रसादिरित्यर्थः २ सर्वमेकत्र संगृह्णाति ३ भेदास्तदेकपंचाशत् तत्तदुद्देशेनास्मिन्नुल्लासे ध्वनेरे
कपंचाशद्भेदा उक्ता इत्यन्वयः तथाहि अविवक्षितवाच्यस्यार्थान्तरसंक्रमितवाच्यात्यन्ततिरस्कृतवाच्यौ द्वौ भेदौ तौ चैके
कशः पदवाक्यगतेति चत्वारः विवक्षितान्यपरवाच्येषु अलक्ष्यक्रमव्यंग्याः पदवाक्यपदैकदेशरचनावर्णप्रबंधभेदेन षट्
विवक्षितान्यपरवाच्येषु लक्ष्यक्रमेषु शब्दशक्तिमूलाश्चत्वारः अर्थशक्तिमूलाः षट्त्रिंशत् उभयशक्तिमूलश्चै
क इत्येकपंचाशति भेदाः शुद्धो ध्वनिः १ एवं शुद्धभेदानुक्त्वा संकीर्णभेदानाह ३ तेषां चान्योन्ययोजने संकरेण त्रिरूपे
ण संसृष्ट्या चैकरूपया न केवलं शुद्धा एवैकपंचाशद्भेदा भवंति यावत्तेषां स्वप्रभेदैरेकपंचाशता सह यथायदनुग्रा
ह्यानुग्राहकतयैकव्यंजकानुप्रवेशेनेति त्रिविधेन संकरेण परस्परनिरपेक्षत्वरूपतयैकरूपया संसृष्ट्या चेति चतुर्भिर्गुण
ने वेदखाब्धिवियच्चंद्राः १०४०४ शुद्धभेदैः सह शरेषुयुगखेंदवः १०४५५ १ तेषामेकपंचाशद्भेदानां क्षीरनीरन्या
येनोत्कटभेदः परस्परसंयोगः संकरः तिलतंडुलन्यायेनोत्कटभेदः संसृष्टिः संकरे क्वचित्साधकबाधकप्रमाणा
भावात्संशयास्पदता क्वचिदंगांगिभावेनानुग्राह्यानुग्राहकता क्वचिदेकव्यंजकपदव्यंग्यत्वेनैकव्यंजकानुप्रवेश इति त्रि
धो भेदाः संसृष्टेस्तूत्कटभेदत्वादेतत्त्रितयासंभवादेकरूपत्वमेवेत्यर्थः शेषं गणितानुलेख्यम् तत्र दिङ्मात्रमुदाह्रियते —
क्रमेणापाङ्गिणी आदेस्य रूपतां गता नाम्ना एकिंपि भणिआ रूवइपते वेत्यर्थः लोअरवलद्धीचरस्मिअणिअणिन्दवराई अज्ञाल

का॰टी॰
५९

पतदेवक्रमेणालक्षयति १ कामिनीकुचकलशवद्गूढमेव चमत्करोति अगूढं तु स्फुटत्वेन वाच्यायमानमिति गुणीभू
तमेव यथा यस्यासुहृत्कृततिरस्कृतिरेत्य तप्तसूचीव्यधव्यतिकरेण युनक्ति कर्णौ काञ्चीगुणग्रथनभाजनमेष सो-
स्मि जीवन्न संप्रति भवामि किमाचरामि अत्र जीवन्नित्यर्थान्तरसंक्रमितवाच्यस्य २ रूढमगरूपेणोद्दिन्नस्याङ्गेनस्येयम
क्तिः अत्र जीवन्न संप्रति भवामीति वाक्ये निजाभिमतकरणसमर्थो न भवामीत्यर्थान्तरे संक्रमितं मम एतादृशस्य मरण
मेव श्रेय इति व्यंग्यं युनक्ति तत्सर्वैर्विज्ञैरप्रतीयमानत्वाद्गूढमिति वाच्यसमतया न चमत्करोति २ उन्निद्रको
कनदरेणुपिशङ्गिताङ्गा गायन्ति मञ्जु मधुपा गृहदीर्घिकासु एतच्चकास्ति च रवेर्नवबन्धुजीवपुष्पच्छदाभमुदया
चलचुम्बिबिम्बम् अत्र चुम्बनस्यात्यन्ततिरस्कृतवाच्यस्य २ अत्र चुम्बनपदस्य वक्त्रसंयोगो वाच्यः रविबिम्बे तदसंभवात्सं
योगमात्रं लक्षयति ततश्च प्रातःकालारम्भो व्यंग्यः स च झगिति प्रतीयमानत्वादगूढः २ अत्रासीत्फणिपाश
बन्धनविधिः शक्त्या भवद्देवरे गाढं वक्षसि ताडिते हनुमता द्रोणाद्रिरत्राहृतः दिव्यैरिन्द्रजिदत्र लक्ष्मणशरैर्लोका
न्तरं प्रापितः केनाप्यत्र मृगाक्षि राक्षसपतिः कृत्ता च कण्ठाटवी अत्र केनाप्यत्रेत्यर्थशक्तिमूलानुरणनरूपस्य २ अ
तिच्छन्नविप्रलापत्वात्किमोमयेत्यर्थो व्यंग्यः स च सर्वप्रसिद्धापदान्तरेणापि दानेनापि प्रतीतेरगूढः २ अत्र वाच्यस्याप्य
स्यमेव पाठान्तरेण दर्शयति ३ तस्याप्यत्रेति तु युक्तः पाठः २ गूढव्यंग्यत्वादिति शेषः तथा ह्यस्मिन्पाठे तु नायकप्र
तिनायकप्रस्तुपनायकेषु लक्ष्मणरावणेन्द्रजित्सु मात्राडुक्तेषु नायकस्य रामस्य गूढव्यंग्यता स्फुटैवेत्यर्थः २ अ
परस्य रसादेः वाच्यस्य वा वाक्यार्थीभूतस्याङ्गरसाद्यनुरणनरूपं वा यथा १ अपरस्य रसादेर्वाक्यार्थीभूतस्यासंल
क्ष्यक्रमो रसादिरङ्गम् अथवा परस्य वाक्यार्थीभूतस्य वाच्यस्य अनुरणनरूपं संलक्ष्यक्रमव्यंग्यमङ्गमिति वा शब्द ५९

गमात्तीरनीरवत्संकरः ताभ्यां सहेति ताभ्यां लिमनस्त ह्ताभ्याम र्थान्तरसंक्रमितवाच्यात्यंततिरस्कृतवाच्याभ्यां सह

तभेदानवरस्कृतवाच्याभ्यां सह रामोस्मीति रामपदवाच्यस्यानुगुणस्य रामत्यागादिवत्सरादिदुःखसहिष्णुत्वेर्था

न्तरे संक्रमितस्यालिमस्त्तह्मनदंत्यगयोर्मेघात्पवनमपूर्वपुष्टातिशययोर्विप्रलंभोद्दीपकयोरनुग्राहकत्वा

गमलक्षभेदत्वेन संकरः रामपदेति एकमेवात्र रामपदं रामत्यागादिदुःखसहिष्णुत्वेर्थान्तरे संक्रमितं सहिप्र

लंभरसव्यभिचारिणः शोकावेगमपि द्योतयति सीताविनापि जीविष्यामीति दुःखसहनात् निष्ठाया रामानुमि

तैः शोकावेगविवर्ददिंतादिव्यभिचारिभिः परिपोषणाद्विप्रलंभरसमपि द्योतयतीत्येकस्यैव व्यंजकस्योभय

शात्मप्रवेशएवदलक्ष्यक्रमेदत्वेन संकरः तथा चोक्तमालोचने सर्वत्र काव्ये रसादितात्पर्यं तावदस्तीति तत्र संध्वनेर्भे

दध्वनेरेकेनवंजकेनाभिव्यंजनेस्निग्धश्यामलेत्यत्र विप्रलंभशृंगाररसतद्व्यभिचारिणश्शोकावेगात्मनश्चव्य

णीयत्वादिति २ उपसंहरति ३ एवमन्यदपुदाहार्यम् १ अवशिष्टाश्रयभेदात्लक्ष्यतोलक्षणीय इति सिद्धिः २

श्रीः इति श्री काव्यप्रकाशदर्पणे चतुर्थउल्लासः ॐ श्रीगणेशाय नमः ॐ गुरुभ्यो नमः एवमुत्तमकाव्यभे

दान्लक्षयित्वावसरप्राप्तान्मध्यमकाव्यभेदान्लक्षयितुमवतारणिकापूर्वमाह एवं ध्वनौ निर्णीते गुणीभूतव्यंग्यस्य

प्रभेदानाह अगूढमपरस्यांगं वाच्यसिद्ध्यंगमस्फुटम् संदिग्धतुल्यप्राधान्ये काक्वाक्षिप्तमसुंदरम् व्यंग्यमेवं गुणी

भूतव्यंग्यस्याष्टौ भिदा मताः अगूढं नत्काले सर्ववेद्यं अस्फुटं विज्ञैरधिकदितिनवेद्यं संदिग्धं वाच्यकृतो वा

चमत्कारो व्यंग्यकृतो वेति न विशेषतोवधारितं म असुंदरं यत्र व्यंग्याद्वाच्यस्यैव चमत्कारित्वम् एवमनेन प्र

कारेण गुणीभूतस्य वाच्यादनतिशयेन समत्वेनाप्यप्रधानीभूतस्य व्यंग्यस्याष्टौ भेदाः नत्यूनाः नाधिका वा इत्यर्थः २

कोपभावप्रशमोऽङ्गम् २ सार्धं कुरङ्गकदृशा मधुपानलीलां कर्तुं सुहृद्भिरपि वैरिणि ते प्रवृत्ते अन्याभिधायि तव ना
म विभो गृहीतं केनापि तत्र विषमामकरोदवस्थाम् अत्र त्रासस्योदयः १ राजविषयरतिभावस्याङ्गमिति शेषः २ अस्मै
द्यातत्कालोल्लसत्सद्भावस्य तपसः कथानां वितत्रभेषप्य चरसिकः प्रोल्लुट्टितः प्रमोदेवो दिश्यात्कपटवटुवेशा
पनयने त्वराशैथिल्याभ्यां युगपदभियुक्तः स्मरहरः अत्रावेगधैर्ययोः संधिः १ तत्काले वटुरूपप्रादुर्भावसमये
उल्लसत्सद्भावः फलप्राप्तिविलम्बात्तमनं यस्य तादृशस्य तपसोऽसोढासत्वरं फलं दत्त्वा तपसः सकाशाद्देवीप्रत्या
वर्तयितुकामस्यार्थः अत्र महादेवरतिभावस्य त्वराशैथिल्याभ्यां गम्ययोरावेगधैर्ययोः संधिरङ्गम् २ पश्येत्कः
श्चिच्चल चपल रे का त्वराहं कुमारी हस्तालम्बं वितर हहहा व्युत्क्रमः क्वासि यासि इत्थं पृथ्वीपरिवृढ भवद्विद्विषोऽर
ण्यवृत्तेः कन्या कांचित्फलकिसलयान्याददानाभिधत्ते अत्र शङ्कासूयाधृतिस्मृतिश्रमविबोधौत्सुक्यानां शब
लता १ हे चपल चलस्य परुषस्यान्वयः अत्र पश्येदिति शङ्का चलचपलेत्यसूया का त्वरेति धृतिः अहं कुमारीति
स्मृतिः हस्तालम्बं वितरेति श्रमः हहाव्युत्क्रम इति मतिरूपो विबोधः क्वासि यासीत्यौत्सुक्यम् इत्थमत्र शङ्कादी
नां भावानां पूर्वपूर्वोपमर्दपरः परोऽयं शबलता राजविषयरतिभावस्याङ्गम् २ अन्यत्र तु प्रधाने वाक्यार्थे यत्राङ्ग
भूतो रसादिरित्यादि पूर्वोल्लासे यदुक्तं तदत्र स्पष्टयति प्रधाने च रसवदाद्यलंकाराः २ एतेषु पराङ्गभूतत्वेन त
गीभूतस्य भेदाः तथा हि अयं स रशनोत्कर्षीत्यत्र केलासालयेत्यत्र च रसवदलंकारः अन्ये त्वाहुः परितादृश
त्रेयसी वदीकृत्य तत्पद्विषामित्यत्र ऊर्जस्वी अविरलकरवालेत्यत्र समाहितमलंकार इत्यर्थः २ एवंभूतानां ५७
भावोदयादीनामलंकारत्वं व्यक्तिविवेककृता तोक्तमित्याशङ्क्याह १ यद्यपि भावोदयसंधिशबलता इति नाल

57

परागमोन्मयः २ हृदयमेव कुमेशोणोल्लाद्दूरति १ अयं तव शानोत्कंधीपीनस्तनविमर्दनः नाम्भूजलवनस्पर्द्धीनी विविक्तेमनः
कारः अत्र शृङ्गारः करुणस्य १ अत्र वाक्यार्थीभूतस्य करुणस्य समलस्य क्रमभंगः शृङ्गाररसांगं तथाहि रशा
नोत्कर्षणादिविलासगस्य शृङ्गारः स्वविच्छेदस्य दुःसहत्वात्करुणमेव पुष्णाति २ कैलासालयभाललोचनरु
चा निर्वर्तितालककक्षतिः पादन्तस्तुतिर्गिरिभुवः सा वः सदा त्रायताम् स्पर्धाबंधसमिद्धयेव सहदन्नूढायया नेत्रयोः
कांतिः कोकनदानुकारसरसा सद्यः समुत्सार्यते अत्र भावस्य रसः १ शिवोपि यत्प्रसादाय प्रणमतीति भगवतीति
षु स्वामिनस्सकलस्य कविरतिभावस्य त्रायतामित्यादिवाक्यार्थीभूतस्य भगवत्याः प्रसादनगमस्य ईर्ष्याविप्रलंभरसो मेल
स्यांगम् २ अत्युच्चाः परितः स्फुरन्ति गिरयः स्फारास्तथांभोधयस्तानेतानपि बिभ्रती किमपि न क्लान्तासि तुभ्यं न
मः आश्चर्येण मुहुर्मुहुः स्तुतिमिति प्रस्तौमि यावद्भुवस्तावद्बिभ्रदिमां स्मृतस्तव भुजो वाचस्ततो मुद्रिताः अत्र भूविषया
रत्याद्यो भावो राजविषयस्य रतिभावस्य १ अत्र पादद्वयगम्यो भूविषयो रतिभावस्तुर्यपादगम्यस्य राजविषयरतिभाव
स्यांगम् २ वंदीकृत्य नृप द्विषां मृगदृशस्ताः पश्यतां प्रेयसां श्लिष्यन्ति प्रणयन्ति लान्ति परितश्चुम्बन्ति ते सैनिकाः अस्मा
कं सुकृतैर्दृशोर्निपतितोस्यौचित्यवारांनिधे विध्वस्ता विपदोखिलास्तदिति तैः प्रत्यर्थिभिः स्तूयसे अत्र भावस्य रसा
भावाभासौ प्रथमद्वितीयार्धपद्योक्तौ १ तयोरभिसंवृद्धिः पश्यतां प्रेयसामित्यनादरे षष्ठी पश्यतः प्रेयसोनादृत्येत्यर्थः
अत्र राजविषयरतिभावस्य प्रथमार्धे प्रतिनायकनिष्ठत्वादनौचित्येनोत्था शृङ्गाराभासोऽङ्गम् तथा द्वितीयस्यार्धेस्यैव
भावस्य प्रत्यर्थिस्तुतिगम्या रतिः प्रत्यर्थिनिष्ठतानौचित्येन भावाभासोऽङ्गम् २ अविरलकरवालकंपनैर्भृकुटीतर्जन
गर्जनैर्मुहुः ददृशे तव वैरिणां मदः सगतः क्वापि तवेक्षणे क्षणात् अत्र भावस्य प्रशमः १ राजविषयरतिभावस्य वैरि

ध्वनिः वाच्यस्य स्वरूपं पद्मिनीवर्जनं तस्याधारो येषां ते तथा स्थितः इत्यर्थः तथा चात्र प्रकृतस्य नायकव्यवहारस्योपस्थाने
विनापि प्रकृतस्य रविवर्जनात्तस्य पर्यवसानाज्जलदपेतत्वमिन्नत एव न वाच्यसिद्ध्यंगतेत्युक्तं निरपेक्षेति २ एवमपरस्मि
ंगलत्वपि वा वाच्यसिद्ध्यंगमुदाहरति ३ वाच्यसिद्ध्यंगं यथा भ्रमिमरतिमलसहृदयतां प्रलयं मूर्छां तमः शरीरसादं
च मरणं च जलदभुजगजं प्रसह्य कुरुते विषं वियोगिनीनाम् अत्र हालाहलं व्यंग्यं भुजगरूपणस्य वाच्यस्य सिद्धि
कृत् १ जलदरूपं भुजगः इति रूपणं वाच्यं तावन्न सिद्ध्यति यावन्न विषमित्यनेन जलवाच्येन हालाहलं व्यज्यते इत्य
र्थः न चात्र विषपदस्य गरलार्थवाचकत्वमेवेति किं व्यज्यत इति वाच्यम् प्रकरणाद्दृष्टेर्बलवत्त्वाद्विषशब्दस्य जल
वाचकत्वमेवेति दिक् अरतिर्विषयवैराग्यम् प्रलयो बहिरिन्द्रियचेष्टाविरहः मूर्छा मनसो बहिरिन्द्रियासम्बन्धः तमो
ध्वान्तदर्शनम् २ यथा वा गच्छाम्यच्युतदर्शनेन भवतः किं तृप्तिरुत्पद्यते किं त्वेवं विजनस्थयोर्हतजनः संभावयत्य
न्यथा इत्यामन्त्रणभंगिसूचितवृथावस्थानखेदालसामाश्लिष्यन्पुलकोत्कराञ्चिततनुर्गोपीं हरिः पातु वः अत्राच्यु
तादिपरमामन्त्रणात्यादिवाच्यस्य १ अत्राच्युतपदेनास्खलितवीर्यत्वमकृतसंभोगत्वमिति यावत् भवतादर्शनेकि
तृप्तिरित्यनेन संभोगेनैव तृप्तिरिति व्यज्यते एतद्व्यंग्यं विना हत्यामन्त्रणानि द्वितीयार्धवाक्यार्थस्य सिद्धिरेव न स्यादि
त्यर्थः २ उदाहरणद्वयस्यान्योन्यं विशेषमाह ३ एतद्वैकत्रैकैकवक्तृगतत्वेनापरत्र भिन्नवक्तृगतत्वेनेत्यनयोर्भेदः १
एकत्र प्रथमोदाहरणे एकस्य वक्तुः कवेरेवोक्तिः द्वितीयोदाहरणे तु कवेः कविनिबद्धस्य चेत्यर्थः १ अस्फुटं यथा
अदृष्टे दर्शनोत्कण्ठा दृष्टे विच्छेदभीरुता नादृष्टेन न दृष्टेन भवता लभ्यते सुखम् अत्रादृष्टो यथा न भवसि वियोगभयं
च यथा नोत्पद्यते तथा कुर्या इत्यक्लिष्टम् १ क्लिष्टं विज्ञैरपि झटिति न संवेद्यम् अत्र यथादृष्टे दर्शनोत्कण्ठा दृष्टे च विच्छे ५८

कारनयोक्तानि तथापि कश्चिद्भुपादित्येवमुक्तम् कश्चिद्विवेचको ध्वनिकारः स्वेवं मन्ते ध्वनिकारादन्यैरेभिरस्माभिर
युक्तमित्यर्थः विवेचितैवैतत्प्राधान्येन वाक्यार्थे यङ्गीगत्वं रसादयुद्देशत्वञ्ध्वनिकृता २ ननु यस्य स्खलनोत्कर्षीत्यादेक
रुणारसादेः स्फुटतयास्फुरति ध्वनित्वे कथमङ्गीभूतो रादरूपत्वमित्याशंक्याह ३ यत्रापि सन्ति विषयोपत्र ध्वनि
गङ्गीभूतवाच्ययोः सम्भेदादिभिः संदेहसंकरः संसृष्टिर्वा नास्ति तथापि प्राधान्येन व्यपदेशा भवन्तीति कश्चित्केनविष
वहारः १ प्राधान्येन चमत्कारकारित्वेन कविविवक्षाविषयत्वेनेत्यर्थः अत्र यथा करुणस्याङ्गीभूतं शृङ्गारस्ये
न परिपुष्टस्य चमत्कारेण न तथा ध्वनिमत्त्वेनेति भावः अपि चात्र करुणरसध्वनेरङ्गीभूतत्वाच्छृङ्गारस्य चोत्कर्षभेद
त्वादस्तोत्वं संसृष्टिः २ एवमसंलक्ष्यक्रमस्य प्रयोगेनाङ्गीभूतमसंलक्ष्यक्रमयोरलंकारवस्तुध्वन्योरप्यस्य
वाच्यस्यागतानां क्रमेण दर्शयति ३ अतस्थाने भ्रान्तिकृतकन्दमनत्साधिनपियावचोचैर्दृष्टीनिप्रतिपदसद्वप्रलपितम्
कृतालेकाभर्तुर्वदनपरिपाटीषु यदनामयामन्तामन्तकुशलवत्तानानन्वयिगता अत्र शब्दशक्तिमूलानुरणनरूपोनामे
णसहोपमानोपमेयभावो वाच्यागतानीतः १ प्रकृताप्रकृतयोरेतत्काव्यकर्तृदीपारचे अत्र तनस्थानभ्रमणादिशब्दश
क्तिमूलत्वेन संलक्ष्यक्रमरूपमानोपमेयभावोऽङ्गयवः वाच्यतामप्राप्तामत्वमिति वाच्यस्याभिधेयस्य रामतत्वस्यादिनत्वे
नत्वरात्वेनागतत्वेनीतः अत्र वाच्यस्यादितमिदिवाच्यप्राप्तालिताध्यप्रन्ययःकापितवाच्यागतानामिति पाठः २ आगत्य
संप्रति वियोगविसंस्थुलाङ्गीमम्भोजिनीं क्वचिदपि क्षपितत्रियामः एतां प्रसादयति पश्य शनैः प्रभाते तन्वङ्गि पादपतनेन
सहस्ररश्मिः अत्र नायकवृत्तान्तोऽर्थशक्तिमूलो वस्तुरूपो निरपेक्षतरविकमलिनीवृत्तान्ताध्यारोपेणावस्थितः १ अत्रपा
दपतनेनेति श्लिष्टशब्देनमत्यपिभूपमाव्यपदेशाभवन्तीत्यर्थशक्तिमूलत्वम् नापिकानायकव्यवहारोऽर्थशक्त्युत्थो वस्तु

स्य व्यंग्यत्वेन प्राधान्यमेव कथं गुणीभूतमित्यत आह वाच्यस्येत्यादि वाच्यस्य प्रतिज्ञातकोरवमपुनर्निषेधस्य निषेधभावेनावि
श्रमामन्तयामस इत्युक्ते वाच्यस्य निषेधस्य समकालं व्यंग्यस्य निषेधाभावस्य प्रतीयमानत्वाद्गुणीभूतत्वमित्यर्थः न
यावलोचनं मुग्धतनको पादिस्पृश्यारणाकालपर्वदीमनारगङ्करस्मात्तत्कालावलाद्विषयस्य निषिध्यमाननये वस्तुनि
स्थिराभिमतमस्ति मार्गं तमावनूपत्ताभिप्रायेण प्रतीयत इति तस्माच्चक्रकाकुतस्तत्कालं व्यंग्यप्रतीतिस्तत्र गुणीभूत
त्वं यत्र त्वविरस्य तत्र ध्वनित्वमेव यथोदाहृतं प्राक् रागहतः स्वैरं विश्रेरित्यादि २ असुन्दरं यथा वाणीरकुडंगोड्डीणसउणि
कोलाहलं सुणन्तीए घरकम्मवावडाए वहूए सीअन्ति अङ्गाइं अत्र दत्तसंकेतः कश्चिल्लतागहनं प्रविष्ट इति व्यंग्यात्
सीदन्त्यङ्गानीति वाच्यं सचमत्कारम् २ वानीरकुञ्जोड्डीनशकुनिकोलाहलं शृण्वन्त्याः गृहकर्मव्यापृताया वध्वाः सी
दन्त्यङ्गानि अत्र चौर्यकामुकस्य समुचितस्थानप्राप्तिं मन्यमानाया वाच्यमेवोपस्कृतं तथाहि गृहकर्मव्यापृतायाः कार्या
न्तराकुलाया अपि वधूः सा तिष्ठतु लज्जावशाया अङ्गानि सर्वमेव वपुः तत्तेकमपि तावद्गन्तुं भीर्यं वशि स्य
वशेन सर्वाङ्गीणं प्राकाम्यमिति सीदन्तीत्यत्राहृदकमंसपादनेनात्मानमपि धर्तुं न शक्नोतीति वाच्यं सातिशयमर्दन
पदं नास्तीत्यत्र यथा प्रत्याययति न तथोक्तं व्यंग्यं तन्मात्रं प्रतीत्यमित्यर्थं नचमत्कारकारि २ एवं गुणीभूतं व्यंग्यमेवाष्टक
मुदाहृत्य तत्रानन्ततां प्रतिपादयितुं प्रपञ्चयति १ एषां भेदा यथायोगं वेदितव्याश्च पूर्ववत् १ यथा पूर्वं सिन्धुनावर्णि
तत्संसृष्टमितरा चारयो भेदाउक्तास्तथैवैषामष्टानां गुणीभूतव्यंग्यभूतानामपि यथायोगं वस्तुमात्रेणालंकारं वा
यत्नपायेउक्तास्त इति विकाः परे सर्वे पि भेदास्तेयाद्यत्यर्थः २ यथायोगपदस्यार्थं ध्वनिकारस्सम्मतिं पूर्वं कृत्वाह १ यथा
योगमिति अयं तेवलमात्रेणायदालंकृतयदात्त एवं ध्वंसंगतानां तां काव्यकृतेत्तदाश्रयादिति ध्वनिकारोक्तादिशाव

ह्ययेनुमेवोध्यस्य नायकस्य पुण्याश्रमाश्रयदेवाकार्यार्थीभूतेरमणीयेनतत्पोक्तंयंयस्य कटित्वसंवेदनात् २ संदिग्धतुल्यप्रा
धान्ये इत्येतन्माधान्यशारूस्य संदिग्धपदेन तुल्यपदेन च समस्तेनाक्रमेणोदाहरणद्वयं दर्शयति ३ संदिग्धतुल्यप्राधा
न्यं यथा हरस्तु किंचित्परिवृत्तधैर्यश्चन्द्रोदयारंभ इवाम्बुराशिः उमामुखे बिंबफलाधरोष्ठे व्यापारयामास विलोचनानि
अत्र परिचुंबितुमैच्छदिति किं प्रतीयमानं किं वालोचनव्यापारणं वाच्यं प्रधानमिति संदेहः २ नयनयोरयरसोद्गाव
गमलोलनया प्रतीयमाना व्यंग्यपरिचुंबनेच्छा प्राधान्येन चमत्कारिणीत्यर्थः अत्र हि हृद्यो वाच्यस्य रागपूर्वकदर्शन
स्य व्यंग्यायाः परिचुंबनेच्छायाश्च संभोगापेक्षया विशेषानवधारणेन प्राधान्यं संदिग्धमिति भावः २ तुल्यप्राधान्य
मुदाहरति ब्राह्मणातिक्रमत्यागो भवतामेव भूतये जामदग्न्यस्तथा मित्रमन्यथा दुर्मनायते अत्र जामदग्न्यः सर्वे-
षां क्षत्रियाणामिव रक्षसां क्षणेन क्षयं करिष्यतीति व्यंग्यस्य वाच्यस्य च समं प्राधान्यम् २ ब्राह्मणानामतिक्रमो वमा
ननेनस्य त्यागः ब्राह्मणमाननमेव भवतां भूतये तथा ब्राह्मणमाननेन तेन भार्गवो मित्रं सुहृत् अन्यथा ब्राह्मणा-
तिक्रमे सति दुर्मनायते ब्राह्मणं वमन्नं संहरतीत्यर्थः अत्र ब्राह्मणसमाननेन मित्रत्वस्य वाच्यस्य तद्वमन्नत्त्वस्य कर
णस्य च व्यंग्यस्य समं तुल्यप्राधान्यम् उभयमतत्पवाचकत्वेन तुल्यप्राधान्यमित्यर्थः २ काक्वाक्षिप्तमयुक्तं यथा मथ्ना
मि कौरवशतं समरे न कोपाद् दुःशासनस्य रुधिरं न पिबाम्युरस्तः संचूर्णयामि गदया न सुयोधनोरू संधिं करोतु
भवतां नृपतिः पणेन अत्र मथ्नाम्येवेत्यादिव्यंग्यं वाच्यस्य निषेधस्य भावेन सहस्थितम् २ अत्र न मथ्नामीति प्रतिज्ञा
ततिषेधवाचकं कोन्नशब्दात्तादृशः द्वितीयस्तु तस्य प्रतिज्ञानतिषेधस्याभाववाचको नञ् काक्वाक्षिप्तः काकुः
लभ्यः तत्र प्रतिषेधद्वयस्याभावाभाववाचकतयावधारणमर्थ इति मथ्नाम्येवेत्यवधारणाव्यंग्यम् तत्रावधारण

का॰टी॰
६०

रोद्भावितविप्रतिपत्तीर्निराकुर्वन्नुक्तध्वनेर्भेदप्रभेदगणनया प्राप्तमानन्त्यं संजिहीर्षुः प्रचुरप्रयोगतामेव तावदुपस्थापयति १
संकलनेन पुनरस्य ध्वनेस्त्रयो भेदा व्यंग्यस्य त्रिरूपत्वात् १ पुनरिति भेदप्रभेदाभ्यामुपलक्षितसंहाराय संकलनं संक्षेपः अस्य प्रकृत
त्वेन गुणीभूतव्यंग्यमिश्रितस्य शुद्धस्य चेत्यर्थः २ तथाहि किंचिद्वाच्यतां सहते २ किंचिदलंकाररूपं व्यंग्यं वाच्यतास
हते प्रायशो व्यंग्यमेव क्वापि वाच्यमपि कर्तुं शक्यते २ किंचिन्न तथा १ किंचिद्रसादिरूपमन्यथा न वाच्यतां सहते किंतु
व्यंग्यमेवेत्यर्थः २ तत्र वाच्यतासहं तु विचित्रमिति वस्तुमात्रम् २ तत्र तयोर्वाच्यतासहयोर्वस्त्वलंकारयोर्मध्ये वस्तुमात्र
वाच्यतासहं व्यंग्यमविचित्रमिति काव्यशोभाकारित्वेनेत्यर्थः २ विचित्रं त्वलंकाररूपम् २ अलंकाररूपं तु व्यंग्यं वाच्यता
सहमपि काव्यशोभाकारि २ ननु यद्यलंकारो व्यंग्यतया काव्यजीवितं सदलंकार्यं कथं तर्हि तस्य पुनरस्यालंकारत्वव्य
पदेश इत्याशंक्याह ६ यद्यपि प्राधान्येन तदलंकार्यं तथापि ब्राह्मणश्रमणन्यायेन तथोच्यते १ यथाश्रमणीभूतो ब्राह्मणः
पूर्वं प्रत्यभिज्ञानबलाद्ब्राह्मण इत्येवाह्वयते तथालंकार्यत्वप्राप्तोपि व्यंग्यावस्थायामुपमादिरूपोलंकारत्वेन व्यपदिश्यते
त्यर्थः २ ननु यदि वस्तुमात्रं व्यंग्यं न तु काव्यशोभाकारि तत्किमर्थं ध्वनिभेदत्वेनोक्तम् सत्यं व्यंग्यस्य वस्तुनो यद्येवं रसभा
वादिपोषकत्वं तदैव ध्वनिप्रकारत्वं नान्यत्र नीरसे प्रहेलिकादौ तथा चाभिनवगुप्तपादाः रस एव वस्तुतः काव्यस्यात्मा
वस्त्वलंकारध्वनी तु रसं प्रति पर्यवस्यतः वाच्यादुत्कृष्टौ तावित्यभिप्रायेण काव्यस्यात्मा ध्वनिरिति सामान्येनोक्तमि
ति २ शब्दस्य संकेतापेक्षावाच्यावगमनशक्तिरभिधा तदन्यथानुपपत्तिसहायार्थावबोधनशक्तिस्तात्पर्यम् मुख्या
र्थबाधादिसहकार्यपेक्षार्थप्रतिभासनशक्तिर्लक्षणा एतच्छक्तित्रयजनितार्थावबोधमूलजाततत्प्रतिभासप्रति
भातप्रतिपत्तृप्रतिभासहायार्थद्योतनशक्तिर्ध्वननव्यापारः स च लक्षणापरीक्षापूर्वं संकेतापेक्षणं स्वार्थोऽर्थप्रतिपाद ६०

त्वमात्रेण यदलंकारो ग्रस्यते नैतत्र गुणीभूतव्यंग्यत्वम् १ तेषु भेदेषु वाच्यवृत्त्यपेक्षयालंकारस्य व्यंग्यस्य चमत्कारित्वा
द्गुणित्वमेव कुतो गुणीभूतत्वेति भावः तथा चोक्तमालोचने यस्मात्तत्र तथाविधव्यंग्यालंकारपरत्वेनैव काव्यं प्रवृत्तम
न्यथा तद्वाक्यमात्रमेव स्यात् चारुत्वोत्कर्षनिबन्धना हि वाच्यव्यंग्ययोः प्राधान्यविवक्षेति यत्र त्वलंकारोऽलंकारान्तरं व्यनक्ति
तत्र वाच्यालंकारापेक्षया व्यंग्यस्यालंकारस्य गुणीभूतत्वं स्पष्टमेव यथा दीपकतुल्ययोगितादावुपमायाः तस्या हि गुणीभूतत्वे
वदीपकादित्वेनैव काव्यस्य चमत्कारित्वात् यथा आलिंगितं शशिमुखीं वीक्ष्य धावयन्ति कीर्तिं च साधयितुमर्हति ये
चलक्ष्मीम् तद्वक्ति मङ्गलसारहृदये च यथैव मदाहं भवन्ति महद्यशो भवन्ता ते ध्वनिगुणीभूतव्यंग्ययोर्मिश्रत्वे नानात्वमाह ३
सालंकारैर्ध्वनेस्तैश्च योगः संसृष्टिसंकरैः सालंकारैरिति तैरेवालंकारैः अलंकारयुक्तैर्ध्वनेः २ सालंकारैरिति कादिना
प्रोसदृशत्वसमानधर्मयोरलंकारशब्देन समासे सभावायुक्तत्वमावर्धहृदयमाह तैरिवेत्यादि यथा ध्वनेरलंकारैः सहृदयैः
संसृष्टिसंकरप्रकारेणोक्तः तथैव तैर्गुणीभूतैर्व्यंग्यैरलंकारसहितैः संसृष्टिसंकरप्रकारकैर्योगः उक्त इत्यन्वयः
२ स्ववचने प्रामाणिकसम्मतिमाह ३ तदुक्तं ध्वनिकृता सगुणीभूतव्यंग्यैः सालंकारैः सह प्रभेदैः स्वैः संकरसंसृ
ष्टिभ्यां पुनरप्युद्योतते बहुधेति १ गुणीभूतव्यंग्यसहितैः वाच्यालंकारान्तरसहितैश्च स्वप्रभेदैः सहितस्य संकरसंस
ष्टिव्यवस्थायां क्रियमाणायां ध्वनेर्बहुप्रकारता इत्यपत इत्यर्थः २ एतदेव प्रपञ्चयति ३ अन्योन्ययोगादेवं स्याद्भेदसंख्या
तिभूयसी एवमनेन प्रकारेणानन्तभेदप्रभेदगणनेति प्रभूतगणना तथा हि शृंगारस्यैव भेदप्रभेदगणनाया
मानन्त्यात्का गणना सर्वेषाम् १ स्पष्टमिदम् २ एवं ध्वनेर्भेदप्रभेदगणनापर्यन्तं लक्षणग्रन्थनिबन्धविशिष्टबुद्धियुक्तये
लक्षणमिदमुपपद्यते वा न वेति परीक्षाग्रहमवतारयति हे काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्वमित्येवध्वनिका

स्वव्याप्तेर्वाधाधभावान्नतुलंलक्षणीयः ९ । गंगायांघोषइत्यादौ यथातयदौ लक्षणीये स्वव्याप्तेर्वाधा
दिहेत्वञ्चपत्तेभवतिनतत्रतथैनर्थः तथाहि स्रन्सेवा सगरहस्मिन्यायुक्तोदादह्वगोष्ठसत्वात्वन्वव्योमि
धात्र्यापावगम्यप्रवत्ता

61

कः स्वतो वाच्य इति रसस्य स्वशब्दस्याभावस्तीत्यभावव्यादिनां विप्रतिपत्तिं निराकुर्वन्नाह । रसादिलक्षणस्त्वर्थः स्वप्नेऽपि न
वाच्यः । वाच्य एवेत्यर्थः । अत्र हेतुमाह । सहि रसादिशब्देन शृङ्गारादिशब्देन वाभिधीयेत न चाभिधीयते । अभिधीये
तेति संभावनायां लिङ् । तेन स्वरसादिशब्दाभ्यामभिधीयमानाभिरपि नैव तावत्तस्य वाच्यत्वमवगम्यते किं तस्य प्रमाणानि
हेतुर्वाच्यत्वमेवेत्यर्थः । प्रमाणमेव दर्शयति । तत्प्रयोगेऽपि विभावाद्यप्रयोगे तस्याप्रतिपत्तेः तदप्रयोगेऽपि विभावादिप्र
योगे प्रतिपत्तेश्चेत्यन्वयव्यतिरेकाभ्यां विभावाद्यभिधानद्वारेणैव प्रतीयते इति निश्चीयते । तेषां रसादिशब्दानां प्रयोगस्त
स्त्वप्रयोगः रसो वाच्यः रसादिशृङ्गारादिपदाभिधेयत्वात् यत्र यत्र रसादिपदाभिधेयत्वं तत्र तत्र रसस्य वाच्यत्वमित्येवमन्व
यव्याप्तिर्न संभवति रसादेः स्वशब्देन वाच्यत्वे व्यभिचारिरसस्यापि भावानां शब्दवाच्यतेति दोषस्य वक्ष्यमाणत्वात् तथाहि
यत्र रसवाच्यताभावस्तत्र रसादिशब्दप्रयोगाभावः इत्येवं व्यतिरेकव्याप्तिरपि न संभवति सर्वत्र रसादिशब्दाभिधेयताभावेऽपि
विभावादिप्रयोगद्वारेणैव रसप्रतिपत्तेः तथा चालोचने स्वशब्दस्यान्वयव्यतिरेकाभ्यामरस्यमानतेति तस्माद्रसो व्यङ्ग्यः वि
भावाद्यभिधानमात्रेण प्रतिपत्तेः यत्र यत्र रसस्य विभावाद्यभिधानद्वारा प्रतिपत्तिस्तत्र तत्र व्यङ्ग्यत्वं यथोक्ते पूर्वोदाहरणे
ष्वित्यन्वयः यत्र यत्र रसप्रतीत्यभावस्तत्र तत्र विभावादिस्वरूपप्रतिपत्त्यभावोऽपि यथा नीरसेषु काव्येष्विति व्यतिरेकः ।
तीत्यमन्वयव्यतिरेकाभ्यां रसो वाच्य इति नासंभवति विभावादीनामभिधानद्वारेणैव प्रतीयते प्रतीयमानतां प्राप्यते इति निश्चीय
ते इत्यर्थः तदेतदुपनयति तेनासौ व्यङ्ग्य एव । तेनान्वयव्यतिरेकाभ्यां प्रमाणाभ्यां निश्चयेनासौ रसो व्यङ्ग्य एव न तु वाच्य इत्य
र्थः । एवं ध्वनेरभावविप्रतिपत्तिं निराकृत्य रसो यदि रसादिशब्दैः साक्षादसंकेतितत्वान्नाभिधेयस्तर्हि यदुपचरितश
ब्दार्थगोचरत्वेनास्त्वित्यसौ प्रयोजनपरत्वादिकया भक्त्या ग्राह्यो भाक्तो लाक्षणिकोऽस्त्विति भाक्तशङ्कामप्यस्य निराकरोति ।

ओं मानंनाम शब्दविचारार्थानिषोधः १ यतोहेतोः सामान्यरूपाज्जातिरूपा एव पदार्थाः तेषामाकांक्षादिवशात् देवदत्तगामा
श्व नयेत्यादौ तात्पर्यशान्मान्यो संसर्गसमन्वयो भासमाने यत्रापदार्थाविशेषरूपायाजातिवाचिनोशब्दानभिधेया
विशेषरूपः सास्नादिमत्त्वे देशाद्देशान्तरप्रापणरूपोवाक्यार्थो यत्तत्रैवंविधिमभिहितान्वयवादेकाक्षावांतौन्मप
स्याभिधेयतायाम् नकापिवार्त्तस्पर्थेः १ इमत्राकूतम् अभिहितानांपृथगेवगवादिपदानामानेत्यादिशंकायांत्त
त्वादिजातौसंकेतितानांपश्चादाकांक्षादिवशात्तात्पर्यशान्मसमन्वयःतुदेवदत्तगामानयेत्यादिलौकवाक्योपिसा
स्नादिमत्त्वेदेशाद्देशान्तरप्रापणरूपोर्थोविशेषरूपः सामान्यवाचिभ्यागवादिपदाभिधेयत्वेनानुपपत्तेः किंतुसमीप
स्तत्तिमत्तम् तेकथमर्थशक्तिमूलेलक्षणाव्यापारश्रयोगानुपपत्तिकस्यान्यभिधाविषयत्वमभिदध्युरिति अनुमानंव्यंजनयो
स्तुभेदमग्रेवक्ष्यति तथाश्वलमशिरोमणिरित्यादावर्थशक्तिमूलमपवासितत्वादिकंव्यापमेवनाभिधेयंसातात्स
तंकेताभावात् तच्चतदपवासितत्वाद्येतात्पर्यशक्तिगम्यंतात्पर्यशाले: पदार्थसंसर्गवोधनमात्रेक्षीणापाः कथम
वासितादिवोधनेसामर्थ्यम् २ एवमभिहितान्वयवादेनव्यंग्यपरीहत्यान्विताभिधानवादेपिदर्शयति ३ येपा
हुः शब्दवृद्धाभिधेयांश्चप्रत्यक्षेणात्रपश्यति श्रोतास्यप्रतिपन्नत्वमनुमानेनचेष्टया अन्यथानुपपत्त्यातुवोधेच्छ
क्तिंद्वयात्मिकाम् अर्थापत्त्यावबुध्यतेसंवंधंत्रिप्रमाणकमितिप्रतिपादितहि शाद्देवदत्तगामानयेत्या प्रयुक्तमध्यमवृद्धवाक
प्रयोगादेशाद्देशांतरेसास्नादिमतमर्थंमध्यमवृद्धेनयंतमन्पश्यति अनेनास्माद्वाक्यादेवंविधोर्थः प्रतिपन्नइतितच्चेष्ट
यानुमायतन्योरखंडवाक्यवाक्यार्थयोरर्थापत्त्यावाच्यवाचकभावलक्षणंसंवंधमवधार्यवालस्तत्रव्युत्पद्यते १
अयमाशयः शाब्दोदेवदत्तगामानयेत्यादिः वृद्धोमध्यमोत्तमावुपदेश्योपदेशकौ अभिधेयःसास्नादिमत्पदार्थस

स्तिथः स्वाभिन्नमुख्यार्थसंबंधः स च मम व्यापकत्वमर्थांतरस्य च व्यतिरिक्तं गमयेदिति मुख्यार्थबाध एव न तच्च स्वरूपार्थस्य कस्यचिद्
संनिवेशेन सामीप्यादिसंबंधायोगात् नापि यत्र लक्ष्ये किंचित् स्यादन्यस्य योन्नतन्तम् २ अन्यत्र मादि लक्ष्योभास्तवस्त न लक्ष्यं भव
किंतत्रैवरूपे नेत्याशंक्याह ३ अर्थांतरसंक्रमितवाच्यस्य तत्तिरस्कृतवाच्यस्य योर्वस्तुमात्ररूपव्यंग्यं विना लक्षणैव न संभव
तीति प्राग्व्युत्पादितम् २ तामस्मिन्नेव श्लोकादावर्थांतरसंक्रमितवाच्ये ध्वनौ लाभिस्त्वेवरूपव्याप्याहृताहितमिति प्रयो
जनभूतं रूढ्यंग्यं वस्तु विना लक्षणैव न स्यात् यत्र प्रयोजनं वस्तु न लक्षणायां भवेत् तस्याविशेषेण न लक्षणमिति
नवस्यापातः तथैवेयं रूढे वक्तृ यत्रैतत्स्यतिरस्कृतवाच्ये एकारान्तिप्राय रूपं प्रयोजनं रूढव्यंग्यं वस्तु विना लक्षणा
भवस्थितिः प्रागुक्तवस्यानात् ३ इत्येतद्व्यागोवमप्यनवस्थास्या यामूलत्वनिकारिणीति द्वितीयोल्लासे दर्शितमित्यर्थः
२ अलंकारव्यंग्यपि लक्षणाशंकावारयति ३ शब्दशक्तिमूलेन अभिधायानियंत्रणेनानभिधेयस्यार्थांतरस्य तेन सहोप
मादेरलंकारस्य च निर्विवादं व्यंग्यत्वम् २ उन्नतप्रकालकरवालेत्यादौ शब्दशक्तिमूले लकारध्वनौ शब्दस्यानेकार्थत्वा
त् निर्णेतृलिंगसंयोगादिनियमनाभावे नानभिधेयस्याभिधावृत्त्या विषयस्यार्थांतरस्य प्राकार्थस्य तथा तेन प्राकरणिक
सह तयोपमादेरलंकारस्य निर्विवादाद मुख्यार्थबाधाद्यभावान्न लक्षणाशंकादीनेत्यपगतमिति लक्षितं चेदनंतर
कार्यस्य शब्दस्य वाचकत्वेनियंत्रित इत्यादौ द्वितीयोल्लासे २ एवं शब्दशक्तिमूले व्यंग्यतां परीत्यार्थशक्तिमूलेपि ता
त्पर्यार्थापिके च विदितं तदेवाह शक्तिमपि तात्पर्यशक्तिं न लक्षणां निवारयन्नपि दाते ३ अर्थशक्तिमूलेपि विशेषसंकेतः
कर्तेन गुह्यते इति सामान्यरूपाणां पदार्थानामाकांक्षासन्निधियोग्यतावशात्परस्परसंसर्गो यत्रापदार्थोपि विशे
षरूपो वाक्यार्थस्तत्राभिहितान्वयवादे का वार्ता व्यंग्यस्याभिधेयतायाम् २ विशेषव्यक्तोसंकेतः कर्तेन गुह्यते

नामन्वितैः पदार्थैरन्वितानामेव संकेतो गृह्यते १ इति यस्मादेवं तस्मान्निष्प्रकारोऽस्मो हेतोः वाक्यस्थितानां वाक्यतया
श्रीः बोधितान्योन्यान्वयानां पदानामन्वितानामर्थस्य काङ्क्षादिमतां अन्वितैः पदार्थान्तरसंपृक्तैः पदार्थैः सह संकेतो
६३ गृह्यत इत्यर्थः २ इति विशिष्टा एव पदार्था न तु पदार्थानां वैशिष्ट्यम् इत्यनेन प्रकारेण विशिष्टा एवान्योन्यसंयो
गेनान्विता एव पदार्थाः न तु पदार्थानां वाक्यस्थितिं विना काङ्क्षादिहीनानां वैशिष्ट्यं समन्वय इत्यर्थः २ ननु यदि
वाक्यस्थानामेवाकाङ्क्षादिमतां पदार्थैरन्वितानां पदानां संकेतः तस्मात् हि क्रियाकारकबोधकत्वात् तेषां कथं प्रतिवा
स्मिन्नाश्रयेविरुद्धोवीरभयानकौततश्चयस्मिन्नाश्रयेवर्णनीयेकथानायकेवीररसउपनिबद्धस्ततस्ततोन्यत्रतर्हिपद्ये
भयानकोनिबद्धव्यःतथाचवैरिणिभयानकवर्णनंकथानायकस्यपराक्रमसंपद्द्योतकतयावीररसपरिपोष(
कमित्येकाधिकरणेपनविरुद्धानामभिन्नाधिकरणत्वंरुणाः योनैरंतर्येएकविषयेसमकालमवस्थित्याविरुद्धो(
शांतशृंगारौतयोरविरुद्धयोःकश्चिद्रसःसमध्येनिवेशयितव्यस्तथाचनिर्दोषतेत्यर्थः २ एतदेवस्पष्टयत्याह ३ वी
रभयाइति १ कार्पण्यस्यवीररसभयावेशाननिरुत्साहत्वाद्वीरत्वहानिः भीतस्यचोत्साहावेशेनभयानकत्वहानि
रित्येवविरोधः २ इतिप्रतिपत्त्यातत्वेनेति १ उक्तोर्थः २ शांतशृंगारयोरिति १ शांतशृंगारयोस्तुपुनःस्वस्वैका
लंएकाश्रयत्वेनाविरुद्धयोरपिनैरंतर्येणैकत्रसमकालमवस्थित्याविरोधःशृंगारत्वेनशांतत्वहानेशांतत्वेनशृं(
गारहतेः २ इतिरसांतरमिति १ रसांतरेकाव्ययत्वेपिद्वयोःशांतशृंगारयोरविरुद्धस्तृतीयोरसोमध्येकार्यः २ १८
एतदेवोदाहरति ३ यथानागानंदे २ चमत्कारितत्वानिर्दोषतामासादयतीतिशेषः २ अविरोधिनारसेनांतरेमध्य(

शान्तशृंगारयोः प्राग्वदाहृते प्रमादे वर्तितोऽत्र निर्दिष्टो विरुद्धकार्यकरणे न दोषस्तं ध्यात्र कृतमण विप्रलंभपोषस्याभावेण
व्यभिचारी न दोष इत्यर्थः तथा चोक्तं भरतेनैव व्याध्युन्मादायस्मारजाड्यप्रसरणादिभिर्विप्रलंभोऽभिनेतव्य इति २
संचार्यादेरित्यादि प्राग्व्याहितरुद्धस्य विभावस्यापि बाध्यतायामदोषतामुदाहरति ३ सत्यमिति १ अत्र प्रथमार्धे का
मशास्त्रस्य विषयस्याचकत्वेन विषयाः कामिनीचंद्रचंदनादयः शृंगारलंबनोद्दीपनविभावाः उत्तरार्धे संसारभीरुता
विषयदोषदर्शनं च शान्तस्य विभाव इत्यनयोर्विरुद्धत्वेऽपि जीवितस्य तरलत्वे कामानां रम्यत्वमकिंचित्करमिति विषय
दोषदर्शनरूपत्व पर्यवसानाद्विषयरम्यताबाधिमा सती शान्तमेव पुष्णातीत्यदोष इति भावः २ नन्वत्रोत्तरार्धेऽपि मता
ग्रन्थाद्युपादानाः शृंगारस्यैव प्राधान्यं न शान्तस्येत्याशंक्याह ३ जीवितादिति १ अतिशयचलत्वेन प्रसिद्धेर्याया
म्बलस्यास्थिरत्वं तद्गुणस्य शान्तरसगुणस्यास्थिरत्वस्योपमेयस्योपमानत्वेनोपात्तं यथापांगभंगस्य चलस्य तथा जीवितमि
ति प्रतीतिसद्भावे न शान्तमेव पुष्णातीति ननूत्तरार्धे शृंगारस्य प्रतीतिः शृंगाराङ्गानां विभावादीनामकरणादिति भावः
२ विनेयानुन्मुखीकर्तुं काव्यशोभार्थमेव वा न हि रुद्धरसस्पर्शः तदङ्गानां विदुष्यतीति शृंगारविरोधिनि शान्तर
से शृंगाराङ्गानां विभावादीनां समावेशः विनेयानामुपदेश्यानां राजपुत्रादीनां शृंगारलंपटानां शृंगारभंग्येव शा
न्तानुन्मुखीकरणायैव शृंगारस्य सकलजनमनोहारित्वात् तदङ्गानामुपमानत्वेन समावेशस्य काव्यशोभाकर
णार्थत्वान्न दोष इत्येवं प्रकारेण ध्वनिकृता अस्मिन्नुदाहरणे निर्दोषता प्रतिपन्ना येन बाध्यबाधकता परिहृत्येयदायस्त
तद्दर्शयितुमाह ३ नतविनय इति २ अत्रास्मिन्नुदाहरणे शान्तशृंगारयोर्बाध्यबाधकभावस्यैव निर्दोषतायां समाधा

वात्र राजा चाटुके राज रतिभावांगत्वेनोपादानात् शृंगारकरुणयोरविरोध इत्यर्थः तथा चोक्तमालोचने सामग्रीविशे
षयतितत्वेन भावानां विरोधाविरोधौ न स्वभावमात्रनिबंधनौ राजनि करुणाप्रतीतिरेव स्थिता ततश्चायं न्यायेन विरुद्धानामन्यपरे
ह्विनापरतेत्युक्तानां तेन क्रमेण स्वात्मपरामर्शेप्यविश्रामप्रत्तकाकथाप रसस्यानुपचिन्तायायेन विरोधः स्यादि
ति २ ताविति कारिकायां स्त्रीलिंगवचनमतंत्रमिति न्यायाद्द्विवचनस्यातंत्रत्वेन बहूनपि दर्शयति ३ क्षिप्त इति १
त्रिपुररक्षवतिभिर्येर्हस्तावलग्नः संक्षिप्तइत्येवमन्वयः सर्वत्र योज्यः कामिपक्षे क्षिप्तोमानाहतः अवधूतोनुपतीप्सितः
साक्षत्वमीर्ष्यया अन्यत्र क्षिप्तमात्रः सत्वाश्रधूननेन विधुवाराक्कृत साक्षात्व निष्कृत्वाष्कृतया अत्र महादेवविषयः क
वेर्भावो गीतस्याकाव्यार्थोत्मनस्त्रिपुरदहनप्रभावातिशयगम्याद्भुतोगान् अद्भुतस्य त्रिपुरवधूनामीर्ष्यापराधः का
मीसमययाप्यवहतवांस्तद्यायामभवः प्रतापाग्निरितीर्ष्याविप्रलंभशृंगारः स्मर्यमाणोधिकतरशोकावेगजन
नादंगमिति बहूनामद्भुतकरुणशृंगाराणामविरोधिनामप्यविशिष्टानां विशिष्टस्यापिवस्यविषयस्वभावस्यादि
नोपेक्षयानविरुद्धत्वम् २ एतदेव बहुप्रयुक्तिमाह ३ इत्यत्र १ प्रकाशितमेतत् २ न त्वत्र पर्यंतेशृंगारेणापोषितः
करुणः प्रधानमेवकर्थं त्रिपुरप्रभावातिशयैषामित्याह ३ तथापि १ यद्यपिशृंगारेणापोषितः करुणस्तथाप्य
करुणः अयथानमेवकथं त्रिपुरप्रभावातिशयैषामित्याह ३ तथापि १ यद्यपि शृंगारेणापोषितः करुणस्तथाप्य
त्रकरुणाविश्रांतिः पर्यवसानेन सदस्त्वित्यादिनाप्रस्तुतेभावेविश्रामात् २ अथवा प्रागिति १ अथवा शृंगारप
रियोक्षितः करुणाङ्गत्वस्यांगीमात्रत्वमुख्यार्थस्यतु भावस्यपोषको स्त्वित्यर्थः २ एतदेव स्थिरयति २ उक्तं हि २ सु
शेणप्राधानोत्तम संस्कारः परेणापरिपुष्टिः २ तदेतद्रूपसंहरति ३ इतिप्रागिति २ इत्यनेन प्रकारेणाप्राकृतिपादि

गेन व्यवहितयोर्विरुद्धयो रसयोर्विरोधं दूषयित्वमेकवाक्यस्थयोरपि दर्शयन्नाह ३ नयदमिति १ परं केवलं यावद
वधारणे २ उदाहरति यथा १ अत्र त्रयाणामपि रसानामेकाश्रयनिबद्धानां बीभत्सशृङ्गारयोरन्योन्यविरुद्धयोर
मयाविरुद्धेन वीररसेन मध्येऽभिहितत्वान्न विरोधः १ प्रकारान्तरेणाप्यविरोधं दर्शयति ३ स्मर्यमाणो विरुद्ध इति १ ह
र्वविस्थायी रसतेनाकर्षणादेः स्मरणं शृङ्गारस्य करुणरसविरोधिनः संभोगस्यापि मनुभावनया पोषकमपि सुहृ
द्विरहेत्तानिविभेदस्य शोकोद्दीपकतया करुणानुकूलमनुद्दृष्टमित्यर्थः तथा चानन्दवर्धनः प्रकृतिरमणीयाः पद
दार्था भ्रष्टोपनीयतां प्राप्ताः प्राग्वस्थाभाविभिः संस्मर्यमाणो रसिकजनशोकवेगमुपजनयन्तीति २ साम्यविवक्ष
यामुदाहरति ३ दंतक्षतानि करजैरिति १ प्रस्तुतयत्र भुक्तया निजायत्तमेव भोक्तुमिष्टं त्वे सिंहैनेतदपत्यरक्षणायदय(
यासागासमर्पयन्तं जिनं प्रति कश्चिदुक्तिरियम् अत्र जिनदेहे सिंहीदन्तक्षतानि क्रोधस्य बीभत्सस्य वा पोषकाण्यपि
कान्तादन्तक्षतस्य शृङ्गारानुभावस्य साम्येनोत्साहातिशयपोषणाज्जिनीदयावीररतिशयमेवद्योतयति अत
एव स्पृहायाः शृङ्गारानुभवस्य साम्येन मुनीनामपि रागिजनवत्स्पृहिणिरिति १ अङ्गिन्यङ्गत्वमाप्तयोरदुष्टतां दर्श
यति ३ क्रामन्त्य इति २ यथा परस्परविरुद्धयोरपि सेवकयोः स्वस्वामिकार्यसाधारणे न करणीयं प्रति न प्रतिकूलता(
किं तु साधकत्वमेव तथा संभोगशृङ्गारकरुणयोरन्योन्यविरुद्धयोरपि वर्णनीयराजप्रतिपत्त्युपवर्णनाश्रयमाहात्म्य
न रतिभावसाधकत्वेत्यर्थः १ नन्वत्र विरुद्धत्वमित्याशङ्कापरिहारार्थमाह ३ यथा अत्र यथागमनागमनयोः परः(
नोत्थानयोर्वचनमौनयोः स्वभावतो विरोधेऽपि एहीति क्रीडतीत्युक्तिप्रकाराङ्गीकृताङ्गत्वेनोपादाने विरोधो नास्ति तथै

209

तस्य च शब्दगताश्चालंकारा हि तद्वत्त्वेनानुप्रासादयः अर्थगताश्चोपमादयः अर्थः वर्णसंघटनापरमार्थमाधुर्यादयस्तेऽपि प्रती
यन्ते तदानतिरिक्तत्वेनेयाः कश्चिद्रूपतागरिकादयो हृमंतेत्या अपि गताः श्रवणगोचरीभूतयस्तु वैदर्भीप्रभृतयस्त ५२
द्गुणातिरिक्ताः कोऽयं ध्वनिर्नाम तत्र माधुर्यादयो गुणाः समवायवृत्त्या अनुप्रासोपमादयस्तु संयोगवृत्त्येति ध्वन्य
भाववादिमतं दूषयितुं नाकारस्येति निर्दिष्टं व्यतिरेकं प्रपंच ३ कश्चिदिति १ अस्यार्थः तथाहुः पूर्वव्यतिरेके शौर्यादि
गुणानां समुचितस्यानुगुणस्याकारमहत्त्वादेर्दर्शनात्मन्यत्वीकरणात् अस्य तु शूराकार एवाकारमात्रेण शूरत्वादे
र्व्यवहारात् यत्राकृतमस्तत्र गुणा वसन्तीति लोकदृष्टेस्तु वर्णनात् यत्र यत्राकारमहत्त्वं तत्र तत्र शूरत्वमिति शूरत्वसा
धनेन हेता अविश्रान्तप्रतीतयः स्ववचनेव्याप्त्यतिव्याप्तिदोषयोरविमर्शनादनवस्थितबुद्धयो न्यायाः अन्यत्र च
रस्मिन् शूरेऽपि वितताकृतिमात्रेण शूरत्वव्यवहारजित्यथा एवं क्वापि कस्मिंश्चित् शूरेऽपि मूर्तिलाघवमात्रेणाह
तुनाकार इति यथा व्यवहरति आकृतिमहत्त्वेऽपि शौर्याद्यसद्भावमाकृत्यमहत्त्वेऽपि शौर्यादिसद्भावमविचार्य केव
लेवं संज्ञामात्रं कुरुते तथैव रसपर्यन्तविश्रान्तिप्रतीतिवन्ध्याः चेतनैर्भिन्ना ये लोके प्रमदादिभिः कारणादिभि
र्न्यादिरसलक्षणग्रन्थेषु विशेषस्वीकारपरिहारनियमाद्यसामान्याधारणेन प्रतीतेरित्यत्र सीतादिशब्दाः
परिहृतजनकजादिशब्दार्थविभावादिशब्दव्यपदेशेन प्रत्याय्यार्थविरामेन सहृदयेषु रसनिष्पत्तिवैलक्षण्यात्यक्तस्व
लक्षणं रसं विभावयन्तीत्यादिप्रायरूपैः प्रमाणैः अहृदयत्वमाप्त्वमिति वक्ष्यमाणनीत्या च सर्वशब्दाना
मात्मगुणस्थानीयानां परस्परसंबन्धेनारात्नेनव्यंजकत्वमापन्नानां सर्वेषां पर्यन्ते रस एव विश्रान्तिरिति प्रतीत्यज्ञा ११॰

नस्य च तत्रोल्लासे विचालितवैयान्तरत्वेन निश्चितस्य रसस्य सामाजिकनिष्ठालौकिकत्वे तेनैव सर्वत्र चमत्कारापरपर्याय(
सामाजिकत्वादविरोध एव सर्वेषामेव सिद्धिः २ इति श्रीकाव्यप्रकाशादर्शे सप्तमउल्लासः   श्रीगणेशाय नमः ॐ गुणा(
शाङ्गिनो व्यापयस्यास्तं गात्मगुणाम्मतनाम् गुणप्रकाशं गुणिनां दर्शये तिमिरापहम् १ पूर्वोल्लासस्संगतिमनुयोत्तय
न्नुत्तरोल्लासमनुपक्रममाणवतारयति २ एवं दोषानिति १ यथात्मनो देहाद्यपेक्षयाङ्गिनो धर्मिण उत्कर्षहेतवो देहादि
यादिभ्यो व्यतिरेकनिमित्तानि एवमचलस्थितयो नाशान्तकाः सहजाः शौर्यादयो धर्मा गुणसंज्ञाः तथैव शब्दार्थशरी
रकं काव्यमास्थितस्याङ्गिनः कविसहृदयतात्पर्यविषयतया प्रधानस्य रसस्य शृंगारादेरुत्कर्षहेतवः परिपोषकाः
सहजाः शौर्यादयो धर्मा गुणसंज्ञाः तथैव शब्दार्थशरीरकं काव्यमास्थितस्याङ्गिनः कविसहृदयतात्पर्यविषयतया(
प्रधानस्य रसस्य शृंगारादेरुत्कर्षहेतवः परिपोषकाः अचलस्थितयः शृंगारे माधुर्यं वीरे ओज इत्यादिप्रकारेण निय
तस्थितयो ये धर्मास्ते गुणसंज्ञा इत्यन्वयः अत्रोत्कर्षहेतव इति दोषव्यवच्छेदः अचलस्थितय इत्यलंकारव्यवच्छेदः
अलंकाराणां हि सर्वत्र विशेषात्क्वापि नियमः २ अत्र शौर्यादय इवात्मन इति दृष्टान्तमन्वेव वृत्तिमाह २ यथा शौ
र्यादयः शास्त्रस्यात्मन एव गुणत्वेन तन्नस्यासिहावयवसन्निवेशरूपस्याकारस्य धर्मत्वेन तथा माधुर्यादयः शृंगारा(
दिरसस्यैव गुणा न तु वर्णानाम् वर्णशब्देनात्र वर्णयति वर्ण्यते वेति व्युत्पत्त्या हृद्ययोः शब्दार्थयोर्ग्रहणम् तथा च लो
चनम् १ वस्तुतो माधुर्यादिकं नाम शृंगारादेरसस्यैव गुणः तत्तन्मधुररसाभिव्यंजकयोः शब्दार्थयोस्तूपचरितं
माधुर्यम् सफ शृंगाररसाभिव्यक्तिसमर्थता शब्दार्थयोर्माधुर्यमिति तल्लक्षणमिति २ शब्दार्थशरीरकाव्ये

220

ॐ निर्व्यक्रमकारिणी रसस्यैव साक्षादुपकारकत्वादेषाम् अलंकारास्तु तत्तद्गतगुणादिवर्णनेरसं विनापि तदृशं तत एव क्व
१११ चिदिवत्तावशात्कदाचिदुपकुर्वंति कदाचिन्नैव नहि येषामुणानामिवरूपकोरसोपकरत्वे नियमः तथालंकाराणां
नियमाभावात् उपकारकत्वमपि परंपरयैव नतु साक्षादिति गुणालंकारयोरन्यान्यवैलक्षण्यम् २ क्रमेणालंका
राणां रसस्योपकारकत्वानुपकारकत्वे उदाहरति १ अपसारयघनसारमिति १ अस्यार्थः अत्रोदाहरणद्वये क्रमा
दनुप्रासोपमयोः शब्दार्थयोर्मुखेन रसमुपकुरुतः अन्वयः तथाहि प्रथमोदाहरणे माधुर्यव्यंजकैर्वर्णैरनुप्रासेन शब्दाव
लंकृत्य विप्रलंभः पोषितः द्वितीये तु मालोपमया तीव्रविषस्य धर्मेण सर्वत्रप्रसरणं विधुतस्यात्रेजितस्याग्नेर्धर्मेण मापि
तया ज्वलनं ज्वरस्य च धर्मप्रत्यंगाहिंसा प्रत्याप्य विप्रलंभः परिपोषितः २ एवमुपकारित्वं दर्शयित्वानुपकारित्वमु
दाहरति १ चित्ते विहत्तदिति २ चित्ते निखाता भवति न विसंवदति मासुरोगुणेश्यायां लुठति विकसति दिक्षु खे
षु वचने वर्तते प्रवर्तते काव्यबंधे ध्यानेन तुटत्ते चिरं तरुणी प्रगल्भा इत्यादौ वाचकमेव १ न तु रसमित्यर्थः अत्र
हि व्यंजकमोजोगुणव्यंजकं प्राकृतं शब्दमात्रप्रधानेपत्तपातप्रासालंकरोति न तु संतमपि पूर्वरागाख्यं शृंगारम्
पत्तपातप्रासस्य मानुरविप्रलंभरसाव्यंजकत्वात् २ मित्रेक्वापि गतेति १ अत्रारीलेव पुपमालंकरो वाच्यं जीवनि
गमनाभावमेवोपकरोति न तु व्यंग्यं संतमपि विप्रलंभाभासम् विप्रलंभे हि प्राणापगममेव वाभिलषणीयः अरी
लायास्तत्रप्रतिबंधकत्वात्स्फुटैव रसानुपकारिता १ एतदेवाह १ अत्र बिसलताजीवमिति १ अत्र विप्रलंभाभासे
विरहिणां मरणमेव कांक्षितमिति जीवरोधनेनोचितमिति प्रकृतस्यानतुकूलेयमुपमेति २ उक्तकारिकाद्वयार्थम् १११

नेनवन्न्यत्वाः स्यात् अहं पृथ्वनिकारमताः तन्न शौर्यादिगुणानां शरीरधर्मत्वे व्याप्यति व्याप्तिदोषापत्तिवत्
मधुरादिरसानां शृङ्गारादिरसानां व्यञ्जकाश्च ते सुकुमारवर्णास्तेषां माधुर्यादिव्यवहारप्रवृत्तेः यत्र यत्र सुकुमा
रवर्णास्तत्र तत्र माधुर्यमिति नियमस्वीकारात् अमधुरादिरसानां रौद्रादिरसव्यञ्जकानां वर्णानां सौकुमार्या
दिमात्रेण माधुर्यादिव्यवहरन्ति मधुरादिरसापकर्षणानां शृङ्गारादिरसव्यञ्जकानां तेषां वर्णानामसौकुमार्यादि
ना माधुर्यादिव्यवहरन्ति निर्विचारैर्लौकिकैर्यथैव संज्ञामात्रं कुर्वते इति २ एवं परमतं दूषयित्वा स्वसिद्धान्तमाह ३ अत
एव माधुर्यादय इति १ अत एवोक्तनीत्या वर्णाश्रयतया व्यभिचारदर्शनात् माधुर्यादयः शृङ्गारादिरसस्यैव धर्मास्त
द्रसानुगुणैर्वर्णैरभिव्यज्यमाना वर्णैर्व्यञ्जितेन न तु वर्णानामेवामी गुणाः २ यथैषामिति १ एषां वर्णानां व्यञ्जकत्ववर्णा
नेकसमासमपि बहुवक्तव्यतयाश्रित्य दर्शयत इत्यर्थः २ एवं गुणलक्षणं विविच्यालङ्कारलक्षणमपि विवि
नक्ति ३ उपकुर्वन्ति तमिति ये धर्मा अङ्गयोः काव्यशरीरभूतयोः शब्दार्थयोर्द्वारेणोत्कर्षमापादयन्त्यनेन तु साक्षा
दङ्गिनो रसस्यैवोत्कर्षकत्वेनावस्थित तत्त सर्वदा नियमेन न तु रसं सन्तं कविविवक्षाविषयीभूतमुपकुर्वन्ति ते त
था सोपमादयोऽलङ्कारसंज्ञा इत्यर्थः अनुप्रासस्य शब्दद्वारा उपमायास्त्वर्थद्वारा रसपोषकत्वमित्यनयोर्ग्रहणम्
२ एतदेव स्पष्टयन्नाह ३ ये वाचकवाच्यलक्षणामिति २ अस्यार्थः यत्र तु नयनगतादिवर्णितरसानामसंभवस्तत्रालङ्का
राः केवला एवं एव स्वभावोक्तिकोषालमात्रप्रतिपादकाः क्वचित्तु सन्तमपि व्यङ्ग्यं रसादि न कवय्य जीवितत्वेन वहन्ता भा
वाच्यशब्दार्थवैचित्र्येणोपकुर्वन्ति कवेरलङ्कारमात्रविवक्षायामेव परितोषादिति गुणानां केवलानां रसं विना स्थि

222

श्री हानाश्च संपाद्यः कवेर्गुणालंकारोपस्कृतौ शब्दार्थौ काव्यमिति हि पर्यवसितम् रीतिरात्मा काव्यस्य जीवितं शरीरस्ये
१२२ वेति विशिष्टपदरचना रीतिः ओजःप्रभृतिभिर्गुणैर्विशेषवत्ता पदानां समर्पितानां रचना यथास्थानमन्वयगुणः
निवेशो रीतिः सा त्रिधा वैदर्भी गौडी पाञ्चालीति समग्रगुणा वैदर्भी ओजःकान्तिमती गौडी माधुर्यसौकुमार्ययोर
भावात् समासबहुला अत्युल्बणपदा चेत्यर्थः माधुर्यसौकुमार्योपपन्ना पाञ्चाली ओजःकान्त्यभावादनुल्बणा विच्छा
या च विच्छाया पुराणच्छायामाश्रितेत्यर्थः तत्र काव्यशोभायाः कर्त्तारो धर्मा गुणा इति ये खलु शब्दार्थयोर्धर्माः का
व्यशोभां कुर्वन्ति ते ओजःप्रभृतयो गुणाः न तु यमकोपमादयः तेषां केवलानामशोभावहत्वात् ओजःप्रभृती
नां केवलानामप्यस्ति शोभाकारित्वम् तदतिशयहेतवस्त्वलंकाराः अलंकारास्तु यमकोपमादयस्ते याः काव्यशो
भाया अतिशयनिमित्तानि न तु कर्त्तारः ते च गुणा ओजःप्रसादश्लेषसमतासमाधिमाधुर्यसौकुमार्योदारतार्थव्य
क्तिकान्तयो दशेति वामनोक्तावयुक्तत्वे हेतुं व्यभिचारेणास्यादर्शयति १ यतः किं त इति १ गुणालंकारोपस्कृतौ
शब्दार्थौ काव्यं रीतिरात्मा काव्यस्य शरीरस्येव जीवितमिति काव्यव्यवहारः शेषमभियोज्यं स्पष्टम् १ अत्र व्यभि
चारं दर्शयति १ यदिमम्मस्ते रिति १ गौड्यां माधुर्यसौकुमार्ययोरभावात् पाञ्चाल्यामोजःकान्त्यभावादसमस्त
गुणत्वेनाव्याप्तिः १ वैदर्भी यथा अनङ्गरामयालम्भुवस्तदपाङ्गस्य भङ्गायः जनयति मुहुर्यन्नामत्तः सन्तापसन्ततिम् यथा
च लताकुञ्जं गुञ्जन्मदवदलिपुञ्जं चपलयन् समालिङ्गन्नङ्गं द्रुततरमनङ्गं प्रबलयन् मरुन्मन्दं मन्दं दलितमरविन्दं तर १२२
लयन् रजोवृन्दं विन्दन् किरति मकरन्दं दिशिदिशि गौडीया यथा चञ्चद्भुजभ्रमितचण्डगदाभिघातसंचूर्णितोरुयुगलस्य

पसंहरति १ एष इति २ गुणाः काव्यात्मभूतस्य रसस्य साक्षादुपकारकाः प्रतिनियताः अलंकारास्तु परम्परयोपका
रा अनियताश्चेति गुणानामलंकाराणां च प्रकृष्टो विभागः अन्योन्यवैलक्षण्यम् न त्वन्यप्रकारक इत्यर्थः २ तदेव ध्वन्यभा(
फ३ वाद्युक्तमन्यप्रकारकं गुणालंकारविभागं दूषयति १ एवमिति २ यथा शौर्यादीनामात्मगुणानां तु पटवद्गुणगुणि
नोः समवाय इति नीत्या युतसिद्धत्वाभावात्सह समवायः हारादीनामलंकाराणां कुण्डलादिवत्पृथक्सिद्धत्वात्संयोग
एव तथैवौजःप्रभृतीनां शौर्यादिवद्रसेण काव्येन सह समवायः अनुप्रासोपमादीनां तु संयोग इतीयं भवद्भिस्तु किं
तोर्गुणालंकाराणां भेदस्तु निरूपत न किंचिदेतदित्यर्थः अत्रास्तीति विभक्तिप्रतिरूपको निपातो निषेधार्थः त
था चाव्ययरत्नमालायां अस्तु भवतु पूर्यते वारणे २ एतन्निषेधोपपत्तिमाह १ ओजःप्रभृतीनामनुप्रासोपमादी
नां चोभयेषामपि समवायवृत्त्या स्थितिरिति गड्डरिकाप्रवाहेणैषां भेद इत्यभिधानमसत् १ लौकिकानामेव गुणा
लंकाराणां समवायसंयोगाभ्यां भेदः काव्ये गुणानामलंकाराणां च शब्दार्थात्मनापृथक्स्थित्योभयेषामपि
समवायात्तस्मैकान्त्यमेव न तु भवदुक्तो भेद इत्यतो हेतोरेषां गुणालंकाराणां भेद इत्यभिधाने समवायसंयोगाभ्यां(
त्या भेदवचनं गड्डरिकाप्रवाहेण गड्डरिकाप्रवाहन्यायेनासत् यथा गड्डरिकायाः कंठस्थायामासन्नग्रंथेः प्रवहणं
कंठस्थभागाय लोके पलायनाय च तथैतद्भेदकथनमसद्दूषणमेवेत्यर्थः २ एवं ध्वन्यभाववादिभिर्भामहादिभिरुक्तं
गुणालंकारभेदलक्षणं दूषयित्वा तन्मतानुयायिना वामनेनाप्युक्तं गुणालंकारविभागं दूषयति १ यदप्युक्त
मिति २ स्पष्टमिदम् २ अस्ति हि वामनमतं काव्यं ग्राह्यमलंकारात् अलंकारः सौन्दर्यं दोषहानाद्गुणालंकारा(

उ० निर्बंधनमसमस्तादीर्घसमासयोरपि न विरोधः वृत्त्यौचित्यं तु यथा असमस्तसमस्तत्वम् उपनागरिकाग्राम्याणां वृत्तीनामौचि
१२२ त्यं आनंदवर्धनाचार्यस्य च अभिनेयार्थे तु सर्वथा रसबंधेष्वभिनिवेशः आख्यायिकाकथयोस्तु गद्यबंधबाहुल्यात् गद्ये च छंदोबंध
विभिन्नप्रस्थानत्वे निबंधनत्वान्नियमहेतुरकृतपूर्वोपि मनाक् क्रियते एतद्यथोक्तमौचित्यमेव तस्या नियामकम् सर्वत्र ग
द्यबंधेपि छंदोनियमवर्जिते तथाख्यायिकायामपि यदा कविः कविनिबद्धो वा वक्ता रसभावरहितस्तदा कामचारः रसभावसम
न्विते तु वक्तरि पूर्वमेवानुसर्तव्यम् अत्रापि विषयौचित्यमेव तत्र आख्यायिकायां भूम्ना मध्यसमासदीर्घसमासे एव संघटने गद्य
स्य विकटनिबंधाश्रयेण छायावत्त्वात् तत्र च तस्य प्रकृष्यमाणत्वात् कथायां विकटनिबंधप्राचुर्येपि गद्यस्य रसबंधोक्तमौ
चित्यमनुसर्तव्यम् स्थितमपि संदर्शयति रसबंधोक्तमौचित्यं भाति सर्वत्र संश्रिता रचना विषयापेक्षं तत्तु किंचिद्विभेदवत् अ
थवा पद्यवद्गद्यबंधेपि रसबंधोक्तमौचित्यं सर्वत्र संश्रिता भवति तत्तु विषयापेक्षं किंचिद्विशेषवद्भवति ततः सर्वाकारम् न
टादिगद्यबंधेप्यतिदीर्घसमासा रचना विप्रलंभशृंगारकरुणयोरपि शोभते नाटकादावप्यसमासैव रचना रौद्रवीरादिवर्ण
ने विषयापेक्षं त्वौचित्यं प्रमाणतोऽपकृष्यते च तथा ह्याख्यायिकायां नात्यन्तमसमासा स्वविषयेपि नाटकादौ रचना
नातिदीर्घसमासा संघटना यादि गन्तव्या वृत्तेर्नाटकस्यैव पदस्य स्थितियोजनं यथा स्थितेतरपतिर्वक्त्रविषयतया
दिष्ट इति तेन स्वार्थोपपत्तिः वाङ्मयसंभाराद्येव केवलमिति रचनासंघटना तर्हि विषयौचित्यं सर्वथैव तस्यां केनेत्याह तदेव
रसौचित्यं विषयं सहकारितयापेक्ष्य किंचिद्विभेदवान् रचनाविषयविशेषे यस्य संपाद्यते न तादृशं भवति एतदेवाविष्कृतमि
ति सर्वकारमिति क्रियाविशेषणम् असमासैवेति सर्वत्रेति शेषः तथाहि वाक्याभिनयलक्षणो चूर्णपदैः प्रसन्नैरेता
हस्तैरभिधानवत् अत्रापवादमाह तथेति नाटकादावितिसर्वविषयेपीति संबंधः ॥ इति श्रीकाव्यप्रकाशादर्शे नवमाष्ट १२२

श्री ह्रीवं पुत्रवियोगादिभाविनत्वं व्याधिरूपस्य विषयस्य विच्छेदेन जायमानो निर्वेदो जन्तुप्रायं चित्तमतिशयेन विलापयति
२२३ विप्रलंभे तु पुनः पुनर्वाञ्छितानाम भीष्टानां प्रियदर्शनादीनामनधिगमेनाभिलाषादिमस्तां जावरस्यादशक
संभवात्करुणातोप्यतिशयितत्वं विषयविच्छेदे परिपुष्टो निर्वेदस्थितं सिक्तवद्द्रावयति जरामं शान्तेतु विषयेच्छाया नि
वृत्तैवस्थायी भवतानिर्वेदस्थितं तत्वतीतमिवसर्पो विलापयति तमामिति क्रमेणात्यन्तद्रुतिहेतुता २ दीप्त्यात्मक
ति १ दीप्तिरात्मा स्वरूपं लक्षणं यस्यास्तादृश्या विस्तरे स्थितत्वविस्तारस्य निमित्तमोजो वीररसस्थितिं यथा शृं
गारे मनागेवाद्रीभावः तथा वीरे मनागेव चित्तज्वलनमित्यर्थः २ चित्तस्येति १ स्निग्धस्यापि सामाजिकमनसो
रूष्यात्मकविषयविशेषसंपर्केण सूर्यकान्तस्येवार्करश्मिसंबंधेन ज्वलनमोजः २ अत्रापि तारतम्यं दर्शयति ३ १
बीभत्सइति १ उक्ततेरुत्रिष्वपि हास्यभयानकरौद्रेषु पारिशेष्यादुभयात्मकत्वेनाभियुक्ताः तथाहि हास्ये शृंगारांगत
या माधुर्यं प्रकृष्टं स्वल्पमोजः भयानके मग्नचित्तवृत्तिस्वभावत्वेपि बीभत्सांगतया प्रकृष्टमोजः स्वल्पमाधुर्यम्
एवमद्भुते वीरांगतया प्रकृष्टमोजः स्वल्पमाधुर्यमिति वर्णयंति २ शुष्केंधनाग्निवदिति १ यथाग्निः शुष्ककाष्ठ
सहसैव व्याप्नोति यथा च स्वच्छं वस्त्रं जलं तत्कालमेव व्याप्नोति तथायो गुणः चित्तं सहसैव व्याप्नोति सप्रसाद
इत्तः सर्वत्र रसेषु झडिति प्रतीयते सर्वास्तु रसना झडिति प्रत्याययति वीररौद्रादिषु शुष्केंधनाग्निवद्व्याप्यव्यापक
ता शृंगारकरुणादिषु स्वच्छजलवदिति निर्णयः २ ननु यद्येते रसानामेव गुणास्तदा शब्दार्थयोस्तर्हि किं यत्काव्यल १ १९३
क्षणे तददोषौ शब्दार्थौ सगुणावलंकृती पुनः क्वापीत्यादिशब्दार्थविशेषणत्वमेषामित्यादिशंकायाह ३ गुणवृत्त्या पुनस्तेषां वृत्तिः १

स्थायिनस्यस्थानीयत्वप्रथनेन गुणानां शौर्यादिवत् नुसारेण्यतिक चारुत्वद्योतिविभीमः अप्यकीर्तिपर्यवसानत् अज्ञानवत्
प्रज्वलत्याइति १ अत्रनीरसत्वादकाव्येपि केवलस्यौजोगुणस्यस्थितत्वात् काव्यत्वातिव्याप्तिः २ एवमव्याप्तिरप्या(
मिथ्यामतदीयगुणलक्षणं दूषयित्वा अलंकारलक्षणमपि दूषयति ३ स्वर्गप्राप्तिरिति १ स्वर्गप्राप्तेर्हि दिव्यदेहः
कारणं तदभावेपि परवर्णितानीति मानुषेणैव देहेन स्वर्गप्राप्तिरित्यारोपविशेषोक्तिः द्वितीयावेत्स्वर्गप्राप्त्यारोपात् हल
कोप्यरसस्यमनुपयाव्यतिरेकः स्फुटइति संतावप्यलंकारो प्रसादादिगुणानां कारणानामभावेन तत्वत्रायाभवन्मते
काव्यशोभायाः कथमतिशय्येत नहेतुः कथं चात्र काव्यव्यवहार इत्यर्थः २ एवं परोक्तगुणालंकारलक्षणयोरभावंश
दर्शयित्वा तदुक्तं गुणविभागं निराकर्तुं स्वसिद्धान्तमनुपस्थापयितुमवतारयति ३ इदानीमिति २ गुणालंकारस
विभागानन्तरं गुणानां विभागो उच्यते इत्यर्थः २ माधुर्यौजइति १ स्पष्टम् २ पदार्थमिति आह्लादकत्वं चमत्कारापर
रपर्यायं सर्वरसेषु साधारणमेवेति विशेषमाह शृंगारे इत्यारीद्रीभावस्य कारणम् येन चित्तं द्रवति तत्प्रकारका
ह्लादकत्वं रूपं माधुर्यं शृंगार एवेत्यन्वयः एवमोजः प्रकारकाह्लादकत्वं वीर एवेत्यादि योद्धव्यम् २ तथा च द्रुतिः
शृंगारस्थायीति १ संभोगशृंगारेमनागेवार्द्रीभावः नत्तु विप्रलंभवदतिशयेनेत्येवमिवशब्दार्थः २ अत्यंता
तिसमस्तार्थप्राप्तं मधुरमिष्यत इति कस्यचिन्माधुर्यलक्षणमाशंक्याह ३ अव्याप्तमिति १ अव्याप्तस्यान्यत्रापि
दर्शनात्केवलेनात्रासाधारणेनेति व्यभिचारः अव्याप्तं माधुर्यलक्षणेनेत्यर्थः २ करुणेति १ तद्द्रुतिरूपं माधुर्य
म् अत्रेदमाकूतम् विषयविच्छेदे हि निर्वेदो जायते निर्वेदात्तु कठिनमपि चेतो जनानादिविवदाद्राद्धिलीयते करुणे

7 229

ॐ पदः स्वयंति अत्रापिवंधविकटत्वम् उज्जलामिश्रितशैथिल्यंयत्रसप्रसादोयथा यत्वंदकोटिकरकोरककारभाजिवा
१२४ [illegible]वभ्रुणिजटापटलेहरस्यतद्वः प्रनात्नुहिमशैलशिलानिकुंजझांकारडंबरविराविसुरापगांभः अत्रप्रतिपद
मोजोमिश्रितशैथिल्यम् तदेवंप्रकारेणप्राचीर्येविवर्णितास्त्रयादयः तेषांविकटत्वंयत्तयोजस्विओजोवाचकशब्दवि
शेषैर्भविश्यत्यर्थः २ एष्वमिति १ एष्वकादत्वमसमासः तद्रूपंमाधुर्यंतेनयद्रक्तंतदसामिर्भयावत्समाणेस्मा
समस्तपदस्यमाधुर्यस्यव्यंजकत्वा विछित्यामात्वाङ पातमंगीकृतमेव तथावत्तत्रोदाहियते अनंगरंगप्रति
मत्यादि २ प्रसादेति १ कथितत्वमसमर्पणमर्थव्यक्तिः सातत्र्युक्तेधनवदितुक्तलक्षणप्रसादएवांतर्भवतीति
प्रथमपादवृत्तिः २ समतायागुणत्वेपिक्वचिद्दोषत्वेत्यनवस्थास्तृचनायचतुर्क्रमेणतृतीयपादस्यवृत्तिमाह ३ मा
र्गाभेतदति १ मसृणेनविकटेनवाबंधेनयपूर्वारब्धंतथैवसमापनंक्वचिद्गुणीयस्पातनयत्राहोषतिदोष
स्यत्याज्यत्वात्रप्रदृहीतेत्यर्थः दर्शितिचैत्तदोषत्वेपतत्प्रकर्षादो २ क्वचिदित्यर्थः यत्रतानौचित्यंतत्रगुणत्वमेवद
र्शयति ३ तथाहिमातंगाः १ अत्रमातंगादिषुमसृणानांवर्णानामारब्धानामपिकोपाटोपत्वादौसिद्धमिथा
नेपारुष्यौचित्तेनत्यागोनगुणएवेत्यर्थः २ एवंतृतीयपादवृत्तिमुक्ताहितीयपादवृत्तिमाह ३ कष्टत्वग्राम्यत्वयो
रिति १ अत्रापारुष्यादिषुरसापकर्षत्वाभावएवनवरसपोषकानेत्येवंसौकुमार्यकांत्योर्गुणलक्षणव्याचात
इत्यर्थः २ चतुर्थपादस्यवृत्तिमाह ३ एवमिति २ एवमेषांशब्दगुणत्वंदूषयित्वार्थगुणत्वमपिदूषयति २ एव
मुक्तयुक्ताशब्दगुणास्तथैवनवैदर्शितिसिद्धम् ३ पदार्थेति १ एकस्मिन्नेववचनादौपदार्थप्रयोज्येनयत १२४

शब्दार्थयोर्मता १ यथात्मनः शौर्यादिशौर्यस्याकारस्य गुणत्वमुपचर्यते तथा स्वव्यञ्जकवर्णादिष्वेनोपचारेण माधुर्यादी
नां शब्दार्थविशेषणत्वमित्यर्थः २ गुणानां दशसंख्याप्रतिषेधमुद्दिश्य पूर्वं विद्युतोऽनि ३ ऊनस्तेत्रय एव न दशे।
त्याह केचिदिति १ केषांचिद्दोषत्वस्वीकारेणसंभवात् केषांचिद्दोषाभावमात्रेण त्रयपर्यायात् केषांचिद्दोषत्वेनन्या
मात्रय एव गुणाः संभवन्ति न तु दशेत्यर्थः २ अत्र दशानामेव गुणानामुल्लेखनात्तो नः केवलत्तः प्रतियोगिनिरूपणा।
धीननिरूपणन्यायेनान्तर्भावाश्रयणाद् ध्यानमुत्तानबोधायमिति माह ३ बहूनामिति १ बहूनामपि पदानामेक
पदवद्भासनमेकस्थानीयान्यविन्यासाच्छुचोच्चयथा केठामरणोदाहृता देव सर्वाशाः हृषिदश्च वीरुधिसदासा
रंगावरुद्धकुधि त्वाम रुद्धमन्दमुन्नमुलिरिन्दुस्त्वद्वदनं स्फुटहिमुष्यन्तात्तमितनभसि रजतसिद्ध्वालायमानो भसि ज्य
ष्टेमासिखरार्कतेजसि कण्ठपाथं व्रजन्त जीवसि अत्र गाढो बन्धो वर्णनीयो ग्रीष्मस्य आरोहो गाढता वरोहः शैथि
ल्यं तयोः क्रमः आरोहपूर्वकोवरोहोवरोहपूर्वोवरोहश्च यमसमाधिर्यथा तत्रैव लोकस्तोकमनूभि रंबुजलेता
भिरस्तंगते गच्छत्यस्तगिरेः शिरस्तदनुचक्रायादरिद्रः शशी प्रत्यासन्नतरोदयस्य तरुणिम्ना वारुणी न्यन्ता।
मंजिष्ठारसलोहितेव दिगपि प्राची समुन्मीलति अत्र पादत्रये गाढो बन्धो वर्णनीयः प्रातःकालः तथा च तृतीये
बंधस्य प्राचीदिशः सान्द्ररागायाः शृंगारित्वेन वर्णनीयायाश्च शैथिल्यं तदपि पूर्वं वा कुत्र्यापेक्षया ततीव्रप्रय।
त्नोऽर्थतया वा गाढप्रायमेव निकटत्वं पदानां यत्र केदारनृत्यत्यायते यत्र सोदारत्ता यथा तत्रैव अश्लेषिणः पु
पुरंतलक्ष्मपीतपीतमायामिनीर्जनमुदारजनीर्यवानः ऊर्वीमर्कुर्वलनवंधनसंधिलोलपादांतसंवलितत्तल

225

टी
१२५

यान्नूपवर्णनमिति वक्ष्यमाणलक्षणेन स्वभावोक्त्यलंकारेणावस्तुनोऽद्रिवादेर्वर्णस्य स्वभावेन स्वरूपेणास्फुटरूपं यस्मात्ता
दृग्गर्थव्यक्तिः स्वीकृता अर्थव्यक्तिः स्वभावोक्तावेवान्तर्भूतेत्यर्थः २ प्रौढास्त्रिचतुरस्रव्यक्तिं पञ्चबाणगुरुपङ्गवाः इतीमं
स्मृतिविभावादिभावानान्यन्तरा रसानां क्रीडति प्रतीयमानत्वेदीप्तत्वे यत्काव्यं कान्तिरिति लक्षणाकान्तिरपि रसध्वनेर्वा
गुणीभूतरसस्य वान्तर्भूता ज्ञानदृष्ट्या वाच्यानीह गुणेनागुणाभावो युक्त इत्यर्थः २ क्रम इति २ दृष्टकामनसस्थि
तैषियन्तमइत्यादौ दर्शनानामनन्तयनयिधानादिक्रियापरंपरारूपः क्रमः पश्चादुपेत्य नयनयिधानादिविदग्धचेष्टि
तकौटिल्यम् अस्य चेष्टितस्य लोके पुत्रवत्क्षोदर्शनात्मसिद्धिरन्त्यलक्षणत्वं एकासनस्थितयोरपि एकस्याञ्चलेनप
रस्या नयनयिधानमनुपपादकं तस्याः पृष्ठागमनमनुपपादकम् तस्य युक्तताविन्यासउपपत्तिरित्येतेषां क्रमादीनां योग
गः संयोजनमेवरूपं यस्यास्तादृशी वासौ घटना तदात्मा तस्य लक्षणः अस्य योनामार्थगुणो य उक्तः सविचित्रत्वमात्र
कविवैदग्ध्यप्रतिपादनमात्रं न तु कश्चिद्रसस्यासाधारणगुणत्वेन पोषक इत्यर्थः २ अवैषम्येति २ अवैषम्यं य
थैव प्रक्रान्तं तथैव निर्वाहः तद्रूपा समता या उक्ता सा दोषस्य प्रक्रमभङ्गस्याभावमात्रं न गुणः न तु रसस्य पोषकः
२ अत्र हेतुमाह १ खल्वन्तुन्मत्त इति २ उन्मत्तो ह्यन्यत्प्रस्ताव्यान्यदभिदधातीति इत्येतावतानुन्मत्तस्य प्रस्तावधान
स्य प्रक्रान्तनिर्वाहो न गुण इत्यर्थः २ अर्थस्येति २ संयोगं डित्तमन्त्रहृनचिबुकमस्यधिनारंगकमित्यादौ हून
म्लेच्छदेशविशेषः तज्जातत्वान्म्लेच्छरूपोऽपि हूनः तस्य स्वभावादेव रत्तस्य संयोगं डनेन मदेन चातिप्रापितारुणाय
चिबुकं तन्मस्फेपन नारंगस्य फलविशेषस्यान्येन वर्णेन न कृतमित्ययोनेः या नितरीनस्या सकपनं समाहितं ना १२५

सम्मुखं ज्योतिरक्षैरित्यादिवाक्यरचनया प्रौढिर्यत्तदोजइत्युक्तं तथायं वीरस्य वांछुपानाद्यवहारवर्णनमितिवाक्यार्थस्य
योक्तं व्योमसाक्ष्येति पदाभिधानेन यत्प्रौढिस्तदोजः अयं नानाकारो भवति सखंडः एवं व्यतिकरः स्त्रीविवाडः एव
वा भवति न भवत्येवं वचनेन तः पुनस्तस्मादूर्ध्वं भवति सखंडः एवं किमपि तत्पुनस्तस्माहूर्ध्वं भवति न सखंडः एवम
पिनेत्यादावदृष्टवैचित्र्यात्सखंडः एवं वैचित्र्यमित्येतावन्मात्रस्यैकस्य वाक्यार्थस्य किंचिद्विशेषविनिवेशनादनेके
वाक्यार्थकल्पितरूपव्यासोयः तदोजः तथैवतेहिमालयमामेयेत्यादावेकेनैव वाक्येन बहूनां वाक्यार्थानां संक्षेपण लभ्यद
समासः प्रौढिर्यत्तदोजइत्युक्तमित्यन्वयः तदेतदुक्तप्रकारलक्षणमोजः वैचित्र्यमात्रप्राधान्येमात्रेनतुगुणः र
सपरिपोषकइत्यर्थः अत्रहेतुमाह तदभावेत्यादि भवतु तल्लक्षणस्यौजसोस्य भवेपि रमस्तत्तथैवकाव्यव्यवहार
प्रवृत्तेः २ दोषत्यागात्परेषितानाइत्यपिदर्शयति १ अपुष्टत्वाधिकइतियथा अह्नरगुणोपुक्रष्टत्वत्यागेनसौकुमार्य
के रसापकर्षकत्वाभावेपि रसोत्कर्षकत्वाभावान्नगुणत्वमोजिः तथैवार्थगुणेषु पुष्टत्वाभावरूपं सामिप्रायत्वल
क्षणमोजोपरुक्तं तस्यापि दोषाभावमात्रत्वमेवनगुणत्वम् एवमधिकपदत्वस्याभावः यावदर्थपदत्वादर्थाद्दर्थ
स्याभिधेयस्यैवमत्वरूपः प्रसादोपि दोषाभावएवनगुणः तथैवानवीकृतत्वाभावरूपमुक्तिवैचित्र्यंतु सेवार्थस्य
विच्छित्तेरपरेणाकथनेयतद्रूपं माधुर्यमपि दोषाभावएवनगुणः तथैवम्रत्तेति वाच्यस्यामंगलस्याश्लीलस्य च त्य
हेतुकस्याभावः यातासुग्रः प्रोषितामित्येवमादिभिः रपारुष्यरूपं रकत्यनुहेतुकं सौकुमार्यं यत्तदपि दोषाभावमा
त्रमेवएवं ग्राम्यत्वाभाववैदग्ध्यं तत्त्वरूपा चोदारता न गुणइत्यर्थः २ अभिधास्यति १ स्वभावोक्तिस्तुडिंठादेस्त्क्रि

226

उ· दीप्रमंत्रेत्तेनैनवर्णारस्यव्यक्त इति श्लोकद्वयेन वर्णानामन्वयव्यतिरेकाभ्यां द्योतकत्वं दर्शितं भवति एषां वर्णानां व्यं
१·१८ जकत्वमुक्त्वा समासस्याह अवृत्तिरिति पदार्थाभिधानवृत्तिः सा च कृत्तद्धितसमासैकशेषाख्याद्यपवाल्पं च वै
त्तिवैयाकरणानुशासनावृत्तिरत्र समासाख्या सा च द्वयोर्बहूनां वा पदानामेकपदप्राप्तिः तस्या अभावः अवृत्ति
स्समासाभाव इत्यर्थः तथा मध्यवृत्तिर्द्वित्रिपदसमासः एवं माधुर्यघटनां मधुराणां पदानां रचना एते माधुर्यगु रा
णं व्यंजयेतीत्यन्वयः २ एतदेव वृत्त्याह १ टठडढवर्जा इति १ स्पष्टम् २ योगा इति १ अन्त्ययोर्द्वितीयचतुर्थयो
वर्णयोरेफेणतुल्ययोः यत्र क्वापि रेफसहितयोः यत्र क्वापि सहितयोः प्रथमेन तृतीयेन च स्ववर्गीणसहसंयोगः
तथा टादिष्टवर्गः शकारसकारौ वृत्तेः समासस्य दैर्घ्यं अधिकपदसमसनम् उद्धत उत्कटः गुम्फः पदरचना
एते ओजोगुणव्यंजकाः २ अत्र वृत्तिमाह १ वर्गप्रथमतृतीयाभ्यामिति १ णकारवर्जिः णकारस्य पूर्वं ग्रह
णात् २ यथा मूर्ध्नि व्यूढहृत्ता विरलगलगलद्रक्तसंसक्तधाराधौतेशांघ्रिप्रसादोपनतजयजगज्जातमिथ्या
महिम्नाम् कैलासोल्लासनेच्छाव्यतिकरपिशुनोत्सर्पिदर्पोद्धुराणां दोष्णामेषामिदं तत्फलमिह नगरीरक्षणे
यत्प्रयासः १ प्रागुक्तार्थमिदम् २ श्रुतिमात्रेण शब्दात्तु येनार्थप्रत्ययो भवेत् साधारणः समग्राणां स प्र र
सादो गुणो मतः समग्राणां रसादीनां समासानां संघटनानां च १ साधारणः माधुर्य ओजस्सु यथायथं तुल्य
स्त्ररसमासरचनेत्यर्थः तथा च ध्वनीनां समर्पकत्वं काव्यस्य यत्तु सर्वरसान्प्रति समप्रसादोयगुणस्तस्य सर्वसाधा १·२८
रणक्रियः सर्वरससाधारणो गुणः सर्वरचनासाधारणश्चेति समर्पकत्वमाह रसादीनामिति अत्रालंका

सम्मुग्धं ज्योतिरन्तरित्यादिवाक्यरचनया प्रौढिर्यत्तदोजइत्युक्तं तथा पंचीरस्सर्वोप्युपानां व्यवहारवेत्तेति वाक्यार्थेऽभि
धानं तत्र महारथेति पदाभिधानेन प्रौढिस्तदोजः अयं नानाकारो भवति सुखेषु एवं व्यतिकरः सुखेषु एवं वा दुःखे
वा भवति न भवत्येव चननः पुनस्तस्माद्दुःखं भवति सुखेषु एवं किमपि तत्त्वनस्तस्माद्दुःखं भवति न सुखेषु एवम
पि नेत्यादावदृष्टवैचित्र्यात् सुखेषु एवं वैचित्र्यमित्येतावन्मात्रस्यैकस्य वाक्यार्थस्य किंचिद्विशेषविनिवेशादनेके
र्वाक्यार्थरचितिरूपं व्यासोयः तदोजः तथैव तेहिमालयमामं...त्यादावेकैकेन वाक्येन बहूनां वाक्यार्थानां संक्षेपण लम्प
समासः प्रौढिर्यत्तदोजइत्युक्तमित्यन्वयः तदेतदुक्तप्रकारलक्षणमोजः वैचित्र्यमात्रं प्रावल्येयमात्रं न तु गुणः र
सपरिपोषकत्वादर्थः अत्र हेतुमाह तद्भावेत्यादि भवतु तल्लक्षणस्योजसोऽसंभवेऽपि रसेतत्त्येव काव्यव्यवहार
प्रवृत्तेः २ दोषत्यागात्परेष्विति अत्पप्रिदर्शयति ३ अपुष्टताधिक इति यथा प्रकृष्टगुणोपकष्टत्यागेन सौकुमार्या
के रसापकर्षकत्वाभावेऽपि रसोत्कर्षकत्वाभावान्न गुणत्वेनोक्तिः तथैवार्थगुणेष्व पुष्टताभावरूपं सामिप्रायत्वल
क्षणमोजोपद्रुतं तस्यापि दोषाभावमात्रत्वमेव न गुणत्वम् एवमधिकपदत्वस्याभावः यावदर्थपदत्वादर्थादर्थ
स्याभिप्रायस्यैवमल्पत्वरूपः प्रसादोऽपि दोषाभावएव न गुणाः तथैवानवीकृतत्वाभावरूपमुक्तिवैचित्र्यं तु स्यैवार्थस्य
विच्छित्त्यंतरेणाकथनं यत्तद्रूपं माधुर्यमपि दोषाभावएव न गुणाः तथैवमर्जतेति वाच्यस्यामंगलस्याश्लीलस्यस्य
हेजवस्याभावः यातायप्राः प्रोषितामित्यत्र मायकर्णिभिरयाकष्टरूपं अन्यत्र तु हेजकं सौकुमार्यमित्यदपि दोषाभावमा
त्रमेव एवं ग्राम्यत्वाभाववैदग्ध्यं तत्तद्गुणत्वेनोक्तानां गुणानां गर्ण्यः २ अभिधास्यति २ स्वभावोक्तिस्तु डिंभादेः स्वक्रि

उ॰ दीर्घसंयोगेनेन वर्णा रसस्य्रत इति श्लोकद्वयेन वर्णानामन्वयव्यतिरेकगम्यं द्योतकत्वं दर्शितं भवति एषां वर्णानां व्यं
१·२६ जकत्वमुक्त्वा समासस्याह अवृत्तिरिति पदार्थाभिधानं वृत्तिः सा च कृत्तद्धितसमासैकशेषाख्यातरूपत्वात्पंचधे
ति वैयाकरणानुशासनाद्वृत्तिरत्र समासाख्या सा च द्वयोर्बहूनां वा पदानामेकपदप्राप्तिः तस्या अभावः अवृत्ति
स्समासाभाव इत्यर्थः तथा मध्यवृत्तिर्द्वित्रिपदसमासः एवं माधुर्यव्यञ्जनामधुर्याणां पदानां रचना एते माधुर्यगु
णाव्यंजयतीत्यन्वयः २ एतदेवद्वयमाह ३ टठडढवर्जा इति १ स्पष्टम् २ योगा इति १ अन्त्ययोर्द्वितीयचतुर्थयो
र्वर्णयोः रेफेण तुल्ययोः यत्र क्वापि रेफसहितयोः यत्र क्वापि सहितयोः प्रथमेन तृतीयेन च स्ववर्णेन सह संयोगः
तथा टादिष्टवर्गः शकारषकारौ वृत्तेः समासस्य दैर्घ्यं अधिकपदसमसनम् उद्धत उत्कटः गुम्फः पदरचना
एते ओजोगुणव्यंजकाः २ अत्र वृत्तिमाह ३ वर्गप्रथमतृतीयाभ्यामिति १ णकारवर्जैः णकारस्य पूर्वत्र ग्रह
णात् २ यथा मूर्ध्नामुद्वृत्तकृत्ताविरलगलगलद्रक्तसंसक्तधाराधौतेशांघ्रिप्रसादोपनतजयजगज्जातमिथ्या
महिम्नाम् कैलासोल्लासनेच्छाव्यतिकरपिशुनोत्सर्पिदर्पोद्धुराणां दोष्णामेषामिदं तत्फलमिह नगरीरक्षणे
यत्प्रयासः १ प्रागुक्तार्थमिदम् २ श्रुतिमात्रेण शब्दान्तु येनार्थप्रत्ययो भवेत् साधारणः समग्राणां स प्र
सादो गुणो मतः समग्राणां रसादीनां समासानां संघटनानां च १ साधारणः माधुर्यस्यौजसश्च यथायथं तुल्या
त्वरससमासरचनेत्यर्थः तथाचध्वनौ समर्पकत्वं काव्यस्य यत्तु सर्वरसान्प्रति स प्रसादो गुणस्तेषु सर्वसाधा १·२६
रणक्रियः सर्वरससाधारणो गुणः सर्वरचनासाधारणश्चेति समग्रपदार्थमाह रसादीनामिति अत्रालंका

र्थगुणायउक्तेः यस्य यदि न भवति दर्शनं यद्विकेनापि महाकविना प्रयुक्तं न दृश्यते तदप्रयुक्ताख्यदोषपर्यवसाना
त्कथं काव्यत्वमित्यर्थः एवं निजनयनप्रतिबिंबैरंबुनि बद्धशाः प्रतारिताः कयाचित् नीलोत्पलेति विमृशति क
रमर्पयितुं कुसुमलावी इत्यादौ नयननीलोत्पलयोः साम्यस्यान्यैरपि वर्णितत्वमित्यन्यच्छायायोनेरर्थ
स्य नीलोत्पलशंकया निजनयनप्रतिबिंबेपि कारणस्पर्शनेच्छानूपस्योक्तिः समाधिर्नाम गुणाय उक्तस्तस्य
यदि न भवति दर्शनं तदा दोष एव यदि तु महाकविप्रयुक्तः क्वापि दृश्यते तत्रौदासीन्यमात्रमेव न तु काचिर
मणीयकताधिनास्य गुणत्वं स्यादिति भावः २ एतदेवोपसंहरति ३ तेन नार्थगुणा वाच्याः १ केचिदंतर्भवंत्ये
श्चिन्ति यत्तत्रार्थगुणानामपि व्युत्पादनादेतेषां याद्यार्थगुणवक्तुं नोचिताः २ अत्र वृत्तिमाह ३ वाच्या वक्तव्याः
१ स्पष्टम् २ रचनावर्णेष्वपि रसादय इति चतुर्थोल्लासे यदुक्तं तदेव दर्शयति ३ प्रोक्ता इति १ योमाधुर्यादयः
शब्दगुणास्त्रयो व्यंग्या उक्ताः तेषां वर्णाश्च रचनाश्च समासस्तत्स्वरूपादिः रचना घटना व्यंजकत्वं प्राप्ताः २
केकस्येत्याह १ व्यंजका इति शेषः २ मूर्ध्नि वर्गान्त्य इति १ आद्यभागे वर्गान्त्यान् ङञणनमान् गच्छंतीति
वर्गान्त्यगाः क्रमेण ङञणनमसंयुक्ताः स्पर्शाः कादयो मावसानाः अटवर्गाः टवर्गं विना तथा रणौ रेफ(
तयोर्मो णकारौ लघू न संयोगाद्यौ न वा संयुक्तौ न सदीर्घस्वराविवर्थः तथा च व्यवधिकृतप्रायो सरेफसंयोग(
गौः वर्गाश्चापि अल्पप्रसो विरोधिनस्युः शृंगारे तेन वर्णा रसः च्युतः एवं तु निवेशिते वीरमत्स्यादौ रसे यदा तदा तं

ग्री कविरिति १ कन्यापुत्रारसंगरसंगामाभ्युदयभूषितं यस्मान्नायकचरितं मुख्यो नायकवास्यानुचरः वक्त्रापवक्त्रव
१०७ तीभ्यां चितम् श्लोकैः संस्कृतेन गद्यते नसाख्यापिकेति कथिता माघ विकाहूर्षचरितादिः इत्येवं लक्षणायां हर्षचरि
तादावाख्यायिकायां गद्यस्य विकटबंधाश्रयेण वचा फलवट्टष्टः शृंगारेणिनमाधुर्यघटनौचित्यमिति भावः २
कथायामिति १ कथायामसरसंवस्तुगद्यै रेव विनिर्मितम् क्वचिदत्र भवेदार्या क्वचिद्वक्त्रापवक्त्रकम् आदौ पद्यैर्नमस्का
रः खलादेर्वृत्तकीर्तनमित्येवंलक्षणायां कादंबर्यादौ वित्यर्थः २ नाटकादौ वेति १ आदिशब्दात्प्रकरणादि
नवकस्य ग्रहणम् तथा च नाटकादीनां दशानामेव रूपकाणां लक्षणं शिष्यबुद्धये लिख्यते अवस्थानुकृति
र्नाट्यं रूपकं दशधाहितम् नाटकं सप्रकरणं भाणप्रहसनडिमः व्यायोगसमवकारौ वीथ्यंकेहामृगा इति नाटि
काथोटकं गोष्ठी सट्टकं नाट्यरासकम् प्रस्थापनोल्लाप्यकाव्यं प्रेंखणं रासकं तथा संलापकं श्रीगदितं शिल्पकं च।
विलासिका दुर्मल्लिका प्रकरणी हल्लीसो भाणिकेति च अष्टादश प्राहुरुपरूपकाणि मनीषिणः नाटकं ख्यात
वृत्तं स्यात् पंचसंधिसमन्वितम् पंचाधिका दशपरास्तत्रांकाः परिकीर्तिताः एक एव भवेदंगी शृंगारो वीर एव
वा अंगमन्ये रसाः सर्वे कार्यं निर्वहणेऽद्भुतम् प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान् दिव्योथ दिव्यादिव्यो।
वा गुणवान्नायको मतः दूराह्वानं वधो युद्धं राज्यदेशादिविप्लवः विवाहो भोजनं शापोत्सर्गौ मृत्यू रतं तथा। १४
दंतच्छेद्यं नखच्छेद्यमन्यद्व्रीडाकरं च यत् शयनाधरपानादि नगराद्युपरोधनम् स्नानानुलेपनं चेति प्रत्यक्षं।
नैव वर्णयेत् इति नाटकलक्षणम् एतदेव यदा सर्वैः पताकास्थानकैर्युतम् अंकैस्तु दशभिर्धीरा महानाट। १०७

रसस्येव सत्त्वं संकीर्णग्राहकः २ उदाहरणं परिम्लानं पीनस्तनजघनसंगादुभयतस्तनोर्मध्यस्यान्तः परिमल(
नमप्राप्य हरितम् ३ इदं व्यस्तन्यस्तं श्लथभुजलताक्षेपवलनैः कृशांग्याः संतापं वदति बिसिनीपत्रशयनम् २
अत्रास्मिन्नर्थे ओजो माधुर्ये स्पष्टं तत्कालमनयार्थयोर्बाधात् प्रसादः २ एवमतिदिष्टस्य क्वाप्यन्यथात्वमाह ३
यद्यपि गुणपरतंत्रा संघटनादयस्तथापि वक्तृवाच्यप्रबंधानामौचित्येन क्वचित् क्वचित् रचनावृत्तिवर्णानाम(
न्यथात्वमपीष्यते २ यद्यपि माधुर्यादीनां गुणानां प्रोक्तक्रमेण स्वस्वसंघटना नियता एवं वर्णसमासौ च सरचना(
तथापि वक्त्रादीनामौचित्यात् अन्यथात्वमुक्तविषयादन्यप्रकारकमपि सहृदयैरिष्टमित्यर्थः २ एतदेव दर्शयति
३ क्वचिद्वाच्यप्रबंधानपेक्षया वक्त्रौचित्यादेव रचनादयः २ मंथो मंथनम् आयस्त आंदोलितः सर्वेषां वाद्यभेदानां(
युगपन्नादजनको णकारः अत्रार्थी कृतस्य प्रत्याहृतिमंगलत्वेन ताडितो दुंदुभिरिति वाच्यम् भीमः सानंदम् अयेकि
मेतदित्यादिः प्रबंधः तयोरनपेक्षया वाच्यप्रबंधयोः क्वचिन्नमपि माधुर्यगुणमनपेक्ष्य वक्तुः क्रुद्धस्य धीरोद्धतस्य
सेस्य प्रधानस्य भीमसेनस्यौचित्यादोजोगुणव्यंजकरचनादयः २ ३ यथमेवाह वृत्तिः ३ अत्रेदि न वाच्यमिति २ अभि
नेयस्तत्सदवस्थानुकरणीयो अर्थो यस्य तन्नाटकं काव्यं नाटकमित्यर्थः नाटके हि नटजनपदसंचलनादिनैवाभिनयोग(
स्पत्तेर्गतितत्प्रतिकूलास्तयोर्वाच्यस्य प्रबंधस्य च प्रतिकूलाः विलंबेनार्थोपस्थापकत्वात्प्रतिकूलारचनादयः
ओजः प्रकाशात् तीव्रप्रयत्नोच्चारितावर्णादीर्घसमासः ३ क्वचिदिति २ अत्र वक्तुः नाटकाख्यस्य प्रबंधस्य चा
पेक्षया दीर्घसमासादावनुचितेपि वाच्यस्य कुंभकर्णोत्तमांगस्यौचित्यादोजस्विनस्तथौजोगुणानुकूलारचनादयः २९

उ॰
१९५
रस्त्रिकपटः कार्यस्त्रार्थं त्रिविद्रवः वस्तु द्वादशनाडीभिर्निष्पाद्यं प्रथमांककम् द्वितीये च चतसृभिर्द्वाभ्यामंके तृती
यके समवकारलक्षणम् वीथ्यामेको भवेदंकः कैश्चिदेकोऽत्र कल्प्यते आकाशभाषितैरुक्तैश्चित्रां प्रत्युक्तिमाश्रि
तैः सूचयेद्भूरिशृंगारं कांश्चिदन्यान्रसानपि मुखनिर्वहणे संधी अर्थप्रकृतयोऽखिलाः वीथीलक्षणम् उत्सृ
ष्टिकांक एकांको नेतारः प्राकृता नराः रसोऽत्र करुणः स्थायी बहुस्त्रीपरिदेवितः प्रख्यातमितिवृत्तं च कविर्बुद्ध्या
प्रपंचयेत् भाणवत्संधिवृत्त्यंगान्यस्मिंजयपराजयौ युक्तं च वाचा कर्तव्यो निर्वेदवचनं बहु उत्सृष्टिकांकपर्यायांकलक्ष
णम् ईहामृगः ख्यातवृत्तः स्याच्चतुरंकः प्रकीर्तितः मुखप्रतिमुखे संधी तत्र निर्वहणं तथा नरदिव्यावनियतौ नाय
कप्रतिनायकौ ख्यातौ धीरोद्धतावन्त्यो विपर्ययादयुक्तकृत् दिव्यस्त्रियमनिच्छन्तीमपहारादिनेच्छतः शृंगा
राभासमप्यस्य किंचित्किंचित्प्रदर्शयेत् पताकानायका दिव्या मर्त्या वापि दशोद्धताः युद्धमानीय संरंभं परं व्याजा
न्निवर्तयेत् ईहामृगलक्षणम् इति रूपकदशकम् अथ उपरूपकाणि नाटिका क्लृप्तवृत्ता स्यात्स्त्रीप्राया चतुरंकि
का प्रख्यातो धीरललितस्तत्र स्यान्नायको नृपः स्यादन्तःपुरसंबद्धा संगीतव्यापृताथवा नवानुरागा कन्यात्र
नायका नृपवंशजा संप्रवर्तेत नेतास्यां देव्यास्त्रासेन शंकितः देवी पुनर्भवेज्ज्येष्ठा प्रगल्भा नृपवंशजा पदे प
दे मानवती तद्वशः संगमो द्वयोः वृत्तिः स्यात्कैशिकी स्वल्पविमर्शाः पदसंधयः नाटिकालक्षणम् १ सप्ताष्ट १४
नवपंचांकपंचांकं त्रोटकमतम् त्रोटकलक्षणम् २ प्रख्यातैर्नवभिः पुंभिर्दशभिर्वालंकृता नोदात्तवचना गोष्ठी १९५
कैशिकीवृत्तिशालिनी हीना गर्भविमर्शाभ्यां पंचषड्योषिदन्विता कामशृंगारसंयुक्ता स्यादेकांकविनिर्मि

कश्चिरे महानाटकलक्षणम् भवेत्प्रकरणे वृत्तं लौकिकं कविकल्पितम् शृंगारोंऽगी नायकस्तु विप्रोमात्योथ
वा वणिक् सापायधर्मकामार्थपरो धीरप्रशान्तकः प्रकरणलक्षणम् भाणः स्याद्धूर्तचरितो नानावस्थान्तरात्म
कः एकांक एवात्र नायकः सुहृत्तो विटः आकाशकथनैर्युक्तस्त्वेकपात्रकृतक्रियः तत्रेतिवृत्तमुत्पाद्यं वृत्तिप्रा
येण भारती मुखनिर्वहणे संधी लास्यांगानि दशैव तु भाणलक्षणम् भाणवत्सर्वसंध्यंगलास्यांगांके विनिर्मि
तम् भवत्यहसनं वृत्तं निंद्यानां कविकल्पितम् अत्र नारभटी नापि विष्कंभकप्रवेशकौ अंगीहास्यरसस्तत्र वीथ्यं
गानां स्थितिर्नवा तपस्विभगवद्विप्रप्रभृतिष्वत्र नायकः एको यत्र भवेद्धृष्टो हास्यं तत्कुलमिष्यते प्रहसनलक्ष
णम् मायेंद्रजालसंग्रामक्रोधोद्भ्रांतिविचेष्टितैः उपरागैश्च भूयिष्ठो डिमः ख्यातेतिवृत्तकः अंगी रौद्ररसस्त
त्र सर्वेऽगानि रसाः पुनः चत्वारोंऽका मता नेह विष्कम्भकप्रवेशकौ नायका देवगंधर्वयक्षरक्षोमहोरगाः भूतप्रेत
पिशाचाद्याः षोडशात्यन्तमुद्धताः वृत्तयः कैशिकीहीना निर्विमर्शाश्च संधयः दीप्ताः स्युः षड्रसाः शान्तहास्यवर्जिता डि
मलक्षणम् ख्यातेतिवृत्तो व्यायोगः स्वल्पस्त्रीजनसंयुतः हीनो गर्भविमर्शाभ्यां नरैर्बहुभिराश्रितः राजर्षिर
थ दिव्यो वा भवेद्धीरोद्धतश्च सः हास्यशृंगारशान्तेभ्यः इतरेऽङ्गिनो रसाः व्यायोगलक्षणम् वृत्तं समवकारे तु ख्या
तं देवासुराश्रयम् संधयो निर्विमर्शास्तु त्रयोंकास्तत्र चादिमे संधी द्वावंकयोस्तद्वदेक एको भवेत्पुनः नायका
द्वादशोदात्ताः प्रख्याता देवदानवाः फलं पृथक्पृथक् तेषां वीरमुख्योऽखिलो रसः वृत्तयो मंदकैशिक्यो नात्र
बिंदुप्रवेशकौ वीथ्यंगानि च तत्र स्युर्यथालाभं त्रयोदश गायत्र्युष्णिङ्मुखान्यत्र छंदांसि विविधानि च त्रिशृंगा

219 219

श्री शिकी संलापकम् ११ प्रख्यातकर्तृमेकाङ्कं प्रख्यातोदात्तनायकम् प्रसिद्धनायकं गर्भविमर्शाभ्यां विवर्जितम्
१२५ भारतीवृत्तिबहुलं श्रीतिशब्देन संकुलम् मतं श्रीगदितं नाम विद्वद्भिरुपरूपकम् श्रीगदितम् १२ चत्वारः शि
ल्पकांकाः स्युश्चतस्रो वृत्तयस्तथा अशान्तहास्याश्च रसा नायको ब्राह्मणो मतः वर्णनात्र श्मशानादेर्हीनः स्यादु
पनायकः सप्तविंशतिरंगानि भवेयुस्तत्र तानि तु आशंसातर्कसंदेहतापोद्वेगप्रसक्तयः प्रयत्नग्रथनोत्कंठाव
हित्थाप्रतिपत्तयः विलासालस्यवाष्पाणि प्रहर्षाश्वासमूढताः साधनानुगमोच्छ्वासविस्मयप्राप्तिपत्तयः ला
भविस्मृतसंस्फेटवाल्लक्ष्म नोच्यते १३ शिल्पकलक्षणम् शृङ्गारबहुलैकाङ्का दशलास्याङ्गसंयुता विदूष
कविटाभ्यां च पीठमर्देन भूषिता हीना गर्भविमर्शाभ्यां सन्धिभ्यां हीननायिका स्वल्पवृत्ता सनेपथ्या भासा विला
सिका १४ विलासिका दुर्मल्ली चतुरंका स्यात्कैशिकीभारतीयुता अगर्भा नागरनरा न्यूननायकभूषिता त्रि
नालिः प्रथमोऽकस्यां विटक्रीडामयो भवेत् पंचनालिर्द्वितीयोऽङ्को विदूषकविलासवान् चतुर्थो द्विघ्ननालिः
स्यादंकः क्रीडितनागरः १५ दुर्मल्ली नाटिकैव प्रकरणी सार्थवाहादिनायका समानवंशजा नेतुर्भवेयत्र
नायिका १६ प्रकरणी हल्लीश एवांकः सप्ताष्टौ दश वा स्त्रियः वागुदात्तैकपुरुषः कैशिकीवृत्तिसंकुलः मुखा
न्तिमौ तथा सन्धी बहुताललयस्थितिः १७ हल्लीशः भाणिका श्लक्ष्णनेपथ्या मुखनिर्वहणान्विता कैशिकीभारती
वृत्तियुक्तैकाङ्कविनिर्मिता उदात्तनायका मंदपुरुषात्रांगसप्तकम् १८ उपन्यासोऽथ विन्यासो विबोधः साध्वसं तथा समर्पणं १२५
निवृत्तिश्च संहार इति सप्तमः उपन्यासः प्रसङ्गेन भवेत्कार्यस्य कीर्तनम् १ निर्वेदवाक्यव्युत्पत्तिर्विन्यास इति संमतः

ना गोष्ठीलक्षणम् ३ सट्टकं प्राकृताशेषपाठ्यं स्यादप्रवेशकम् न च विष्कम्भकोऽप्यत्र प्रचुरश्चाद्भुतो रसः अङ्का
जवनिकाख्यास्स्युः स्यादन्यन्नाटिकासमम् सट्टकलक्षणम् ४ नाट्यरासकमेकाङ्कं बहुताललयस्थिति उ
दात्तनायकं तद्वत्पीठमर्दोपनायकम् हास्योऽङ्ग्यत्र सशृङ्गारो नारी वासकसज्जिका मुखनिर्वहणे सन्धी लास्याङ्गा
नि दशापि च ५ नाट्यरासकलक्षणम् प्रस्थाने नायको दासो हीनः स्यादुपनायकः दासी च नायिका वृत्तिः कै
शिकी भारती तथा सुरापानसमायोगादुद्दिष्टार्थस्य संहृतिः अङ्कौ द्वौ लयतालादिर्विलासो बहुलस्तथा ६
प्रस्थानम् उदात्तनायकं दिव्यवृत्तमेकाङ्कभूषितम् शिल्पकाङ्गैर्युतं हास्यशृङ्गारकरुणै रसैः उल्लाप्यं बहुस
ङ्ग्रामं स्याद्गीतमनोहरम् चतस्रो नायिकास्तत्र त्रयोऽङ्का इति केचन उल्लाप्यम् काव्यमारभटीहीनमेकाङ्कं हास्य
संकुलम् खण्डमात्राद्विपदिकाभग्नतालैरलंकृतम् वर्णमात्राछड्डणिकायुतं शृङ्गारभूषितम् नेता स्त्री चाप्यु
दात्ता च सन्धी आद्यौ तथान्तिमः काव्यम् ८ गर्भविमर्शरहितं प्रेङ्खणं हीननायकम् असूत्रधारमेकाङ्कमविष्क
म्भप्रवेशकम् नियुद्धसम्फेटयुतं सर्ववृत्तिसमाश्रयम् नेपथ्ये गीयते नान्दी तथा तत्र प्ररोचना प्रेङ्खणम्
९ रासकं पञ्चपात्रं स्यान्मुखनिर्वहणान्वितम् भाषाविभाषाभूयिष्ठं भारतीकैशिकीयुतम् असूत्रधारमे
काङ्कमवीथ्यङ्गकलान्वितम् श्लिष्टनान्दीयुतं ख्यातनायकं प्रतिनायकम् उदात्तभावविन्याससंश्रितं चोत्तरो
त्तरम् इह प्रतिमुखं सन्धिमपि केचित्प्रचक्षते १० रासकम् संलापकेऽङ्काश्चत्वारस्त्रयो वा नायको मतः पाष
ण्डः स्याद्रसस्तत्र शृङ्गारकरुणेतरः भवेयुः पुरसंरोधच्छलसंग्रामविद्रवाः न तत्र वृत्तिर्भवति भारती न च कै

120

उं· यसमासौ संदानितकं त्रिभिर्विशेषकम् चतुर्भिः कलापकम् पंचप्रभृतिभिः कुलकम् इति क्रियासमाप्तिकृता भेदा इति द्वंद्वेन निर्दे
१२० शः अवांतरक्रियासमाप्तावपि वसंतादिवर्णनैकदेशवर्णनपरः पर्यायबंधः एकं धर्मादिपुरुषार्थमुद्दिश्य प्रकारवैचि
त्र्येणानन्तवृत्तांतवर्णनप्रकारा परिकथा एकदेशवर्णना खंडकथा समस्तफलांतेतिवृत्तवर्णनात्मिका सकलकथा द्वयोरपि प्राकृतप्र
सिद्धत्वाद् द्वंद्वेन निर्देशः पूर्वेषां तु मुक्तकादीनां भाषायामनियमः महाकाव्यरूपः पुरुषार्थफलः समस्तवस्तुवर्णनाप्र
बंधः सर्गबंधः संस्कृत एव अभिनेयार्थं नाटकादि तोटकरासकप्रकरणावांतरप्रपंचसहितमनेकभाषाव्यामि
श्रम् आख्यायिकोच्छ्वासादिना वक्त्रापरवक्त्रादिना च युक्ता कथा तद्विरहिता उभयोरपि गद्यबंधरूपतयाद्वंद्वेन
निर्देशः आदिग्रहणाच्चम्पूः यदाह दंडी गद्यपद्यमयी चम्पूरिति तदाश्रयेणापि संघटना विशेषवती भवति तत्र
मुक्तकेषु रसबंधाभिनिवेशवती भवति तत्र मुक्तकेषु रसबंधाभिनिवेशिनः कवेस्तदाश्रयमौचित्यम् तच्च दर्शितमे
व अन्यत्र कामचारात् मुक्तकेषु हि प्रबंधेष्विव रसबंधाभिनिवेशिनः कवयो दृश्यंते तथा ह्यमरुकस्य मुक्तकाः
शृंगाररसस्यंदिनः प्रबंधायमानाः प्रसिद्धा एव संदानितकादिषु तु विकटबंधौचित्यान्मध्यमसमासदीर्घसमा
से संघटने असमासरूपायां हि संघटनायां संपूर्णरसरूपाप्रतीतिः साकांक्षमतीविरामक्रियापदं हृदयं न तथावर्ती
ता अप्रतीतावेव भवंतीति तास्त्रीतरसतत्त्ववर्णनायोग्यास्युरिति भावः प्रबंधाश्रितेषु यथोक्तप्रबंधविशेषौचित्यमेवानु
सर्तव्यम् संदानितकादिषु कुलकांतेष्विति शेषः पर्यायबंधे पुनरसमासामध्यमसमासे एव संघटने कदाचिदर्थौचि १२
त्याश्रयेण दीर्घसमासायामपि संघटनायां परुषा ग्राम्या च वृत्तिः परिहर्तव्या कदाचिदिति वीरादिविषये परिकथायां का १२१
मचारः तत्रेतिवृत्तमात्रोपन्यासेन नात्यंतं रसबंधाभिनिवेशात् खंडकथासकलकथयोस्तु प्राकृतप्रसिद्धयोः कुलकादि

भूतिना शोभितो यस्मात् ३ मिथ्याख्यानं तु साध्यसम् ४ उपालम्भं वचः कोपपीडनं तस्य मर्षणम् ५ निदर्शनस्योपन्यासो नि
वृत्तिरिति कथ्यते ६ संहार इति तन्मात्रं स्यात् कार्यस्य समापनम् ७ भाविकालस्तवनम् ३ प्रमुखं रूपकाणां दश इति प्रासं-
गिकमिदं समाप्य प्रकृतमुच्यते नन्दकादौ तु रूपिणि दीर्घसमासादयः १ उक्तलक्षणो नाटकादिषु प्रभिनेयार्थस्य प्राधु-
र्यत्वेन भवताः रूपिणि विकल्पो चिन्त्यमित्यर्थः आख्याते चैतद्धि मन्तव्यं धन्यालोचने रसौचित्यप्राधान्येन प्रति-
पाद्यः तदानन्त्यं लौकिकव्यपायका विरोधिनः सर्वात्मनैव परिहार्याः एवं संघटनासमासानामनेकप्रकारत्वात्समा-
वनयासमासः संघटनाचरत्र स्तीति कदाचिद्यदस्तानीतजनानामनभिनिवेशः शोभते विप्रापतामभिनेयार्थे इति २
एतत्सर्वं समुपसंहरति ३ एवमन्यदप्यनुसर्तव्यम् १ प्रमाणीकृतकाव्योक्तानां मुक्तकसंस्थानितनकादीनां काव्यप्रभेदानामौ-
चित्यम् तथा चैतदेव विषयाश्रयमप्यन्यदौचित्यं तानि यच्छति काव्यप्रभेदाश्रयतः स्थिता भेदवतीहि सा वक्तृवाच्य-
गतौचित्यस्यापि विषयाश्रयमन्यदौचित्यसंघटनां नियच्छति विषयाश्रयं तु समासानां विशेषीकरणमादिरपि प्रकृष्टः तदा
दिस्यानन्दवर्धनाचार्येणैवास्त्रेण काव्याकारमपि संख्यातविशेषात्मकसंघातेनकादिसंघ विषयविशिष्टतदौचित्यं तत्तेन
मुक्तकेषु विषयश्रद्धेयत्वपदेनासमस्तानामभावेनस्वातन्त्र्यमात्रं प्रदर्शयितुं स्वप्रतिष्ठितमाकाङ्क्षारहितमिति अपि शब्देन माह
सन्दानितकादिषु चौचित्यं विषयौचित्यं केवलं तारतम्यभेदमात्रमपेक्षते विषयौचित्येन वक्तृवाच्यौचित्यमिति वा-
च्येन भवति यतः काव्यप्रभेदा मुक्तकसंस्कृतप्राकृतापभ्रंशनिबद्धम् सन्दानितविशेषककलापकुलकानि पर्यायबन्धः
परिकथाखण्डकथासकलकथासर्गबन्धोभिनेयार्थमाख्यायिकाकथेत्येवमादयः मुक्तकमन्येनानालिङ्गितं स्वतन्त्र
तया परिसमाप्तिनिराकाङ्क्षार्थमपि प्रबन्धमध्यवर्ति मुक्तकमित्युच्यते तदेवमसमानादिविशेषणम् द्वाभ्यां क्रि-

इति सकृदुक्तत्वान्नाते धर्मेणापाय मनवर्तिनि विक्षेप धर्ममूलमिदं स्मृतं ग्रन्थतो धर्मजिज्ञासा चोदनालक्ष
णोऽर्थो धर्मः श्रेयान् स्वधर्मः धर्मो देवत्वं कृततत्त्वे धर्मः श्रोत्रियकेनैव धर्मस्य ब्रह्मगम्यत्वे च धर्मे का फल
प्रमादस्य स्वकामस्य धर्मो रत्नानि शक्तिनः धर्माधर्मौ न हि पाकाद्धर्मेनितासमानेन समादि श्रुतं स्य धर्म
शाठ्ये प्रयोग दर्शनात् देवदत्त इति वत् पदेन प्रयोगाः सन्तीति च न वैषम्यात् देवदत्तशब्दस्य ग्रन्थे कस्मा
दृष्टे एवं त्रयधर्मे मिमांसा दोक्ता विनत्वं पीयधर्मे शाब्दस्य प्रयोगे लक्ष्यो षष्ठी समासः कल्पते इति पाधश्चतिया
दकभावः संबन्धः षष्ठ्यर्थः नाविकमाशनादि धर्मं व्याख्यास्य धर्मस्य विशेषेणासंगच्छते धर्मस्य च तदे
शाद्वैतिनियमात् स्वतस्त्वं जनानि च नारिवेदस्य नामानि न च वदास्वधीरभ्यानेन धीन सङ्क्रमामाय
विशेषरूपेणामयप्रसंभवन् ग्रा ... ...
धर्मपर्यायानामभिधानात् इह तु धर्मस्वरूपस्य धर्मप्रमाणस्य चाभिधानात् यदपि समासगुणोभूत
स्यापि त्रयी शाब्दस्य विधेयत्वान्न दृष्टकदेशस्य त्रयीशाब्दस्य वक्तृविवक्षावशान्न च तु शब्देन परामर्शेत्यक्ते ना
दपि ननु तस्मिन्नेव त्रयी धर्मस्याविधेयत्वात् न दृष्टकदेशस्य त्रयीशाब्दस्यान्तर्वाहतासंभवात् वेदस्यैव तच्छब्देन
परामर्शसंभवाच्च वदपि यथाशास्त्रानुशासनमिति दृष्टान्तप्रदर्शने तदर्थ्येन प्रत्यक्षे वेदस्यैव परामर्श
संभवति तेन विशेषणत्वादिः ननु न वेद विहितत्वे धर्मत्वं वेदस्य धर्मे प्रमाणमिति तत्र धर्मे लो
कात् प्रियतेवाजते इति धर्मस्य ... ... ॥ इति ... ॥

122